GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA


CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 23602

CALL No. 091.4912/G.O.M.L.M.

D.G.A. 79

AS.
3-12-13



A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGÀCÂRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

23302

VOL. V.—DHARMA-ŚĀSTRA,

091.4912
G.O.M.LM

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1909.

1199/13

...L ARCHAEO...
...BRARY, NEW DELHI.
...No. 23602
...te. 23-4-58
...ll No. 691.4912/G.O.N.L.M

CONTENTS.

CLASS IV.

DHARMA-ŚĀSTRA.

I. Original Smṛtis.

Name of the work.	Numbers.	Pages.
Āṅgirasasmṛti	2611 to 2613	1919 to 1922
Āṅgirasadharmaśāstra	2614	1922
Ātrēyadharmaśāstra	2615 to 2618	1922 to 1924
Ātrēyasmṛti	2617 to 2619	1924, 1925
Āpastambasmṛti	2620 to 2622	1925 to 1927
Auśanasasmṛti	2623	1927 to 1929
Kaṇvasmṛti	2624, 2625	1929, 1930
Dakṣasmṛti	2626 to 2630	1930 to 1932
Nārāyaṇasmṛti	2631, 2632	1932 to 1934
Parāśarasmṛti	2633 to 2645	1934 to 1939
Parāśarasmṛtivyākhyā Mādhavīyā	2646 to 2649 2655, 2657	1939 to 1944 1949, 1950
Parāśaramādhavīya	2650 to 2654, 2656	1944 to 1949
Bārhaspatyasmṛti	2658	1950
Bṛhatkauṇḍinyasmṛti	2659 to 2661	1950 to 1954
Bṛhatparāśarasmṛti	2661	1952 to 1954
Bṛhadviṣṇusmṛti	2662	1954, 1955
Manusmṛti	2663 to 2670	1955 to 1958
Manusmṛtivyākhyā	2671, 2672	1959, 1960
Yamasmṛti	2673 to 2675	1960 to 1962
Yājñavalkyasmṛti	2676 to 2680	1962 to 1965
Yājñavalkyasmṛti with Ṛjumitākṣarā	2681 to 2699, 2706	1965 to 1974, 1976
Yājñavalkyasmṛti with Mitākṣarā	2700 to 2705	1975, 1976
Yājñavalkyasmṛtivyākhyānadīpikā	2707	1977
Likhitasmṛti	2708	1977 to 1979
Lōhitasmṛti	2709	1979, 1980
Vasiṣṭhasmṛti	2710 to 2716	1981 to 1985
Viśvāmitrasmṛti	2717	1985 to 1987

I. Original Smṛtis—*continued.*

Name of the work.	Numbers.	Pages.
Viṣṇusmṛti	2718	1987, 1988
Vyāsasmṛti	2719 to 2722	1988 to 1990
Śāṇḍilyasmṛti	2723 to 2727	1991 to 1994
Śātātapasmṛti	2728 to 2730	1994 to 1996
Saṁvartasmṛti	2731 to 2733	1996 to 1998
Hāritasmṛti	2734 to 2739	1998 to 2004

II. Digests—(General).

Avaśiṣṭadharmanirūpaṇa	2740	2005, 2006
Ācāranavanīta	2741	2006, 2007
Kamalākarabhaṭṭīya	2742, 2743	2008, 2009
Caturvargacintāmaṇi	2744 to 2756	2009 to 2016
Dravyaśuddhidīpikā	2757	2016, 2017
Dharmapravṛtti	2758 to 2763	2017 to 2021
Dharmaśāstraviṣaya	2764 & 2765	2021 & 2022
Bhagavantabhāskara	2766 to 2768	2023 to 2026
Sadācārasaṅgraha	2769	2026 to 2028
Sadācārasmṛti	2770	2028, 2029
Smṛtikaumudī	2771 & 2772	2029 to 2034
Smṛtikaumudīviṣayasūcikā	2773	2034 & 2035
Smṛticandrikā	2774 to 2783	2035 to 2041
Smṛticūḍāmaṇisaṅgraha	2784	2041, 2042
Smṛtinavanīta	2785	2042 & 2043
Smṛtibhāskara	2786 & 2787	2043 to 2046
Smṛtimuktāphala	2788 to 2801	2046 to 2055
Smṛtiratnamahōdadhi	2802 to 2804	2055 to 2057
Smṛtiratnākara	2805 to 2807	2057 to 2060
Smṛtisaṅgraha	2808 & 2809	2061 & 2062
Smṛtisārasaṅgraha	2810	2063 & 2064
Smṛtisārasamuccaya	2811 & 2812	2064 to 2068
Smṛtyarthasāra	2813 to 2815	2068 to 2070
Smṛtyācāraprāyaścittasaṅgraha	2816	2070 & 2071
Smṛtyācāravacanāni	2817	2071

III. Digests—(Special).

(1) Āhnika.

Ācamanavidhi	2818	2072
Ācāryagunādarśa	2819	2073 & 2074
Ādhāraśaktitarpaṇa	2820 & 2821	2074 & 2075
Āhnika	2822 to 2832	2076 to 2089
Āhnikasaṅgraha	2833 & 2834	2089 to 2091

III. DIGESTS—(SPECIAL)—*continued.*

1. *Āhnika*—continued.

Name of the work.	Numbers.	Pages.
Urdhvapuṇḍravidhi	2835 to 2837	2091 to 2093
Aupāsana	2838 to 2841	2093 to 2097
Tripuṇḍravidhi	2842	2097 & 2098
Dēvarṣipitṛtarpaṇaprayōga	2843	2098
Nityakramasaṅgraha	2844	2099
Brahmayajña	2845 to 2848	2099 to 2102
Brahmayajñaśirōratna	2849	2103 & 2104
Yajñōpavītapratiṣṭhāvidhi	2850 to 2852	2104, 2105
Yajñōpavītavidhi	2853	2103
Viśēṣasnānavidhi	2854	2106 & 2107
Śaucavidhi .. .	2855	2107 & 2108
Śaucasnānavidhi	2856	2108
Śrīcūrṇadhāraṇamantra . .	2857	2108 & 2109
Saccaritraparitrāna	2858	2109 to 2111
Saccaritrarakṣā	2859 to 2862	2111 to 2114
Saccaritrasudhānidhi	2863 & 2864	2114 to 2118
Sacchūdrāhnika	2865	2118 & 2119
Sadācāravidhi	2866 & 2867	2119 to 2121
Sandhyāvandanamantra	2868 to 2874	2121 to 2124
Sandhyāvandanamantrarsicchandōdēvatā ...	2875	2125
Sandhyāvandanamantrabhāsya ...	2876 to 2889	2125 to 2138
Sandhyāvandanavidhi	2890 & 2893	2138 & 2139, 2141
Sandhyōpasthānamantra	2891	2139 & 2140
Samidādhāna	2892	2140

(2) *Ācāra.*

Agnisandhānavacana	2894	2142
Agnisamsargavidhi	2895	2142 & 2143
Aṅkurārpaṇavidhi	2896	2143 & 2144
Adhyāyōtsarjanavidhi	2897	2144 & 2145
Arkavivāha	2898 to 2900	2145 to 2148
Ācāravacanāni	2901	2148 & 2149
Āturasannyāsavidhi	2902 to 2904	2149 to 2151
Ātmāgnihōtravidhi	2905	2152
Āśramadharmasāra	2906	2152 & 2153
Gṛhadēvatāsamprōkṣaṇavidhi	2907 & 2908	2153 to 2155
Gṛhārcāpratiṣṭhāvidhi	2909	2155 & 2156
Gṛhārcāsamprōkṣaṇavidhi	2910	2156 & 2157

III. Digests—(Special)—*continued.*

(2) *Ācāra*—continued.

Name of the work.	Numbers.	Pages.
Gōtrapravarakārikā	2911	2157
Gōtrapravarakhaṇḍa	2912 to 2921	2157 to 2166
Gōtrapravaranirṇaya	2922 to 2929	2167 to 2172
Gōtrapravaranirṇaya with commentary	2930 to 2932	2172 to 2174
Gōtrapravaramañjarī	2933 & 2934	2175
Gōtrāmṛta with commentary	2935	2175 to 2177
Catuścatvāriṁśatsaṁskāra	2936	2177 & 2178
Cāturmāsyavidhi	2937	2178 & 2179
Patnībhōjanapātraniyama	2938	2179
Padmākṣatulasīmālikāpratiṣṭhā	2939 & 2940	2180 & 2181
Pārvaṇasthālīpāka	2941	2181 & 2182
Madhvamatācāravidhi	2942	2182
Yatidharma	2943 to 2946	2183 to 2186
Yatidharmanirūpaṇa	2947 & 2948	2186 & 2187
Yatidharmasamuccaya	2949 to 2954	2187 to 2190
Yatipatnīdharmanirūpaṇa	2955	2191
Yatiliṅgasamarthana	2956	2191 & 2192
Yativapanavidhi	2957	2192 & 2193
Yativiṣayavacanāni	2958	2193
Rajasvalāsnānavidhi	2959 to 2961	2194, 2195
Rājābhiṣēkavidhi	2962	2195 & 2196
Vacanasārasaṅgraha	2963	2196 & 2197
Varjyāhāravivēka	2964 & 2965	2197 & 2198
Varṇāśramadharma	2966	2198 & 2199
Vibhūtidhāraṇavidhi	2967	2199
Vivāhapīṭhādilakṣaṇa	2968	2200
Vivāhayōgyastrīnirṇaya	2969	2200 & 2201
Vivāhavidhi	2970	2201 & 2202
Vṛṣōtsarjana	2971	2202 & 2203
Vaiṣvadēvavidhi	2972 & 2973	2203 to 2205
Vaiṣṇavaprakriyāsaṅgraha	2974	2206
Vaiṣṇavācārapaddhati	2975	2206 & 2207
Śūdrācāra	2976	2208 & 2209
Ṣaṭkarmacandrikā	2977 to 2979	2209 to 2212
Satkriyākalpamañjarī	2980	2212 & 2213
Sannyāsanirṇaya	2981	2213 to 2215
Sannyāsavidhi	2982	2216
Sāpiṇḍyadīpikā	2983	2217
Sūtrayajñōpavītatvasamarthana	2984	2217 & 2218

III. DIGESTS—(SPECIAL)—*continued.*

(3) *Āśauca.*

Name of the work.	Numbers.	Pages.
Aghanirṇaya	2985 to 2989	2219 to 2221
	2998 & 2999	2228, 2229
Aghanirṇaya with commentary	2990 to 2995	2222 to 2227
Aghanirṇaya with Smṛtisārasarvasva	2996 & 2997	2227, 2228
Aghapañcaṣaṣṭi	3000 & 3001	2229 to 2230
Aghapañcaṣaṣṭi with commentary	3002 & 3003	2231 to 2234
Aghaprakāśikā	3004	2234 & 2235
Aghapradīpa with commentary	3005	2235 & 2236
Aghavivēcana	3006 to 3009	2236 to 2238
Aghavivēcana with commentary	3010	2238 to 2240
Abhinavaṣaḍaśīti with Dharmapradīpikā	3011 to 3018	2240 to 2245
Āśaucakhaṇḍa	3019	2245 & 2246
Āśaucatriṁśacchlōki wtih commentary	3020 & 3021	2246 & 2247
Āśaucadarpaṇa	3022	2248, 2249
Āśaucadaśaślōkī	3023 & 3024	2249
Āśaucadaśaślōkīvyākhyā	3025	2250 & 2251
Āśaucadaśaślokī with Kanarese commentary ...	3026	2251
Āśaucadīpikā	3027	2251 & 2252
Āśaucanirṇaya	3028 to 3030	2252 to 2257
Āśaucaviṣaya	3031 to 3033	2257 to 2260
Āśaucasaṅgraha	3034 & 3035	2260 to 2262
Āśaucaṣṭakī	3036	2262
Vaidyanāthasaṅgraha	3037	2263
Śuddhicandrikā	3038	2263 & 2264
Śuddhicandrikāvyākhyā	3039	2264 to 2266
Ṣaḍaśīti with commentary	3040 to 3043	2266 to 2269
Ṣaḍaśīti with notes	3044	2269 & 2270
Sūtakanirṇaya	3045	2270

INDEX ... ... i to xvii

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

VOLUME V.

CLASS IV.— DHARMA-ŚĀSTRA.

I. ORIGINAL SMṚTIS.

No. 2611. आङ्गिरसस्मृतिः.

ĀṄGIRASASMṚTIḤ.

Substance, palm-leaf. Size. 15 × 1¼ inches. Pages, 88. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

A work on purificatory and expiatory observances.

The Smṛtis mostly take their names from those of the sages who are held to be their authors and deal with Ācāra, Vyavahāra and Prāyaścitta generally. Sometimes they deal with only one or two of these subjects as the case may be.

Complete in 11 Adhyāyas.

Begins on fol. 1*a*. The other works herein are : **Yamadharmaśāstram** 44*b*, Hārītasmṛtiḥ 47*a*.

Beginning :

पावकप्रतिमं साक्षात् मुनिमङ्गिरसं द्विजाः ।
ब्रूहि धर्मानशेषान्न इत्यूचुः प्रणिपत्य तम् ॥
तेभ्यस्स तु ततः प्रीत्या शृणुध्वमिति चाफणत् ।
वच्मि तानखिलान् धर्मान् वैदिकान् मुक्तये परान् ॥

धर्मस्स्यात् चोदनाप्रोक्तः तदन्यस्तूपचारतः ।
लिङ्गादिरूपा सा ज्ञेया मुक्तिदा श्रुतिचोदिता ॥

* * * *

जलं यत्रैव वर्तन्ते(र्तेत) तदेव परमं स्थलम् ।
प्रभूतैघोदकग्रामस्सर्वदेशोत्तमोत्तमः ॥
नदीतीरं विशेषेण तच्छताधिकउ(मु)च्यते ॥
तत्रैव सकला धर्मा अनुष्ठेया हि सन्ततम् ।
नदी च सजला ज्ञेया न तच्छून्या कदाचन ॥

Colophon :

इति पूर्वाङ्गिरसं समाप्तम् ॥

(उत्तरभागप्रारम्भः)—

विश्वरूपं नमस्कृत्य देवं त्रिभुवनेश्वरम् ।
धर्मस्य दर्शनार्थाय चाङ्गिरा इदमब्रवीत् ॥
अथ त्रयाणां वक्ष्यामि प्रमाणं विधिमादितः ।
धर्मस्य पार्षदस्यैव प्रायश्चित्तक्रमस्य च ॥
प्रायश्चित्तचतुष्पादं विहितं धर्मकर्तृभिः ।
परिषद्दशधा प्रोक्ता त्रिविधा वा समासतः ॥

* * * *

स्वाभिप्रायकृतं कर्म विधिविज्ञानवर्जितम् ।
क्रीडाकर्मैव बालानां तत्सर्वं स्यान्निरर्थकम् ॥

Colophon :

इत्याङ्गिरसधर्मशास्त्रे उपोद्घातः प्रथमोऽध्यायः ॥
इत्याङ्गिरसधर्मशास्त्रे परिषदुपस्थानं नाम द्वितीयोऽध्यायः ॥

* * * *

इत्याङ्गिरसधर्मशास्त्रे प्रायश्चित्तविधिर्नाम तृतीयोऽध्यायः ॥

* * * *

इत्याङ्गिरसधर्मशास्त्रे परिषल्लक्षणं नाम चतुर्थोऽध्यायः ॥

* * * *

इति प्रायश्चित्तनियन्तृकथनं नाम पञ्चमोऽध्यायः ॥

* * * *

इत्याङ्गिरसधर्मशास्त्रे षष्ठोऽध्यायः ॥

* * * *

इति पापपरिगणनं नाम सप्तमोऽध्यायः ॥

* * * *

इत्यभक्ष्यभक्षणप्रायश्चित्तं नामाष्टमोऽध्यायः ॥

* * * *

इति हिंसादिप्रायश्चित्तं नाम नवमोऽध्यायः ॥

* * * *

इत्याङ्गिरसधर्मशास्त्रे गोवधप्रायश्चित्तं नाम दशमोऽध्यायः ॥

End:

सर्वोपायप्रयत्नेन तोषयेत् ब्राह्मणान् सदा ॥

समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।

अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

इत्याङ्गिरसस्मृतौ कृच्छ्रकथनं नाम एकादशोऽध्यायः ॥

Colophon:

आङ्गिरसस्मृतिस्समाप्ता ॥

No. 2612. आङ्गिरसस्मृतिः (पूर्वभागः.)

ĀṄGIRASASMṚTIḤ (PŪRVABHĀGAḤ.)

Substance, palm-leaf (Śrītāla). Size, 20 × 2¼ inches. Pages, 35. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 67*a*. The other works herein are: Manusmṛtiḥ 1*a*, Dakṣasmṛtiḥ 52*a*, Āpastambasmṛtiḥ 55*a*, Kaṇvasmṛtiḥ 85*a*, Viṣṇusmṛtiḥ 101*b*, Smṛtyācāravacanāni 106*a*.

Incomplete.

No. 2613. आङ्गिरसस्मृतिः (पूर्वभागः).

ĀṄGIRASASMṚTIḤ (PŪRVABHĀGAḤ.)

Substance, paper. Size, 13¼ × 8⅛ inches. **Pages**, 100. **Lines**, 21 on a page. **Character**, Telugu. **Condition**, good. **Appearance**, old.

Begins on fol. 11*a*. The other works herein are : **Dakṣasmṛti** 1*a*, **Ātrēyadharmaśāstra** 9*b*.

Incomplete; wants beginning and end.

No. 2614. आङ्गिरसधर्मशास्त्रम् (उत्तरभागः).

ĀṄGIRASADHARMAŚĀSTRAM (UTTARABHĀGAḤ).

Substance, palm-leaf. Size, 13⅛ × 1¾ inches. **Pages**, 15. **Lines**, 9 on a page. **Character**, Grantha. **Condition**, good. **Appearance**, old.

Begins on fol. 3*a*. The other works herein are : **Bārhaspatyasmṛti** 1*a*, **Vyāsasmṛti** 11*a*, **Ātrēyadharmaśāstra** 16*a*, **Yamadharmaśāstra** 22*a*, **Dakṣasmṛti** 25*a*, **Śātātapadharmaśāstra** 34*a*, **Saṁvartadharmaśāstra** 43*a*, **Parāśaradharmaśāstra** 55*a*, **Vāsiṣṭhasmṛti** 80*a*, **Śāṇḍilyasmṛti** 121*a*.

Complete in 12 Adhyāyas.

No. 2615. आत्रेयधर्मशास्त्रम्.

ĀTRĒYADHARMAŚĀSTRAM.

Pages, 11. **Lines**, 10 on a page.

Begins on fol. 16*a* of the MS. described under No. 2614.

Complete in 6 Adhyāyas.

Beginning :

हुत्वाग्निहोत्रमासीनमत्रिं व्रतवतां वरम् ।
उपागतास्स पृच्छन्ति ऋषयस्संशितव्रताः ॥
भगवन् केन दानेन जप्येन नियमेन च ।
शुद्ध्यन्ते पातकैर्युक्तास्तान् ब्रवीष्व (ब्रूहि त्वं) महामुने ॥

अविख्यापितदोषाणां पापानां महतां तथा ।
सर्वेषाञ्चोपपन्ना(पापा)नां शुद्धिं वक्ष्यामि शाश्व(तत्त्व)तः ॥
प्राणायामैः पवित्रैश्च दानैर्होमैर्जपैस्तथा ।
शुद्धिकाम(मा)ः प्रमुच्यन्ते पातकेभ्यो न संशयः ॥
प्राणायामान् पवित्रांश्च व्याहृतीः प्रणवं तथा ।
पवित्रपाणिरासीनो ब्रह्महत्त्यैक(विन्यस्त)मभ्यसेत् ॥

* * * *

इत्यात्रेयधर्मशास्त्रे प्रथमोऽध्यायः ॥

* * * *

इत्यात्रेयधर्मशास्त्रे रहस्यप्रायश्चित्तकथनं नाम द्वितीयोऽध्यायः ॥

* * * *

इत्यात्रेयधर्मशास्त्रे दानप्रकरणं नाम तृतीयोऽध्यायः ॥

* * * *

इत्यात्रेयधर्मशास्त्रे रहस्यप्रायश्चित्तकथनं नाम चतुर्थोऽध्यायः ॥

* * * *

इत्यात्रेयधर्मशास्त्रे पितृमेध(प्र)रकणं नाम पञ्चमोऽध्यायः ॥

End:

तत्पत्न्यान्तु प्रसूतायां सूतके दशमेऽहनि ।
क्षौरं कुर्यात्ततः पूतो दानभोजनयोग्यता ॥
जलमध्ये जलं तो(दे)यं पितृणां जलमिच्छताम् ।
अतस्स्थले न दातव्यं पितृणां नोपगच्छति ॥
आर्तवाभिप्लुतां नारीं स्पृष्ट्वा भुङ्क्ते त्वकामतः ।
तदन्नं छर्दयित्वा तु कुशवारि पिबेदपः(थ) ॥
एतां दृष्ट्वा तु यो भुङ्क्ते प्राजापत्यं विशोधनम् ।
आर्तवे तु प्लुते नार्ये(यौ) संभाषेतां मिथो यदि ॥

मोहाद्वा जा(ज्ञा)नतो वापि उपवासन्तयोर्भवेत् ।
उदक्यायाः करेणाथ भुक्त्वा चान्द्रायणञ्चरेत् ॥

Colophon:

इत्यात्रेयधर्मशास्त्रे आचारप्रकरणं नाम षष्ठोऽध्यायः ॥

इत्यात्रेयस्मृतिस्समाप्ता ॥

No. 2616. आत्रेयधर्मशास्त्रम्.

ĀTRĒYADHARMAŚĀSTRAM.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 4. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the 6th Adhyāya, complete.

Begins on fol. 7*b*. The other works herein are: Vyāsasmṛtiḥ 1*a*, Śātātapadharmaśāstra 9*b*, Parāśarasmṛtiḥ 15*a*, Śāṇḍilyasmṛtiḥ 42*a*, Hārītasmṛtiḥ 63*a*, Manusmṛtiḥ 83*a*.

No. 2617. आत्रेयस्मृतिः.

ĀTRĒYASMṚTIḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 1203.

Adhyāyas 1 to 4 complete. 5th wanting; and 2 copies of Adhyāya 6, of which the first begins in fol. 38*a*.

No. 2618. आत्रेयधर्मशास्त्रम्.

ĀTRĒYADHARMAŚĀSTRAM.

Pages, 3. Lines, 21 on a page.

Begins on fol. 9*b* of the MS. described under No. 2613.

6th Adhyāya, incomplete.

No. 2619. आत्रेयस्मृतिः.

ĀTRĒYASMṚTIḤ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 4. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

6th Adhyāya, complete

Begins on fol 24*a*. The other works herein are: Samvartasmṛti 1*a*, Hārītasmṛti 11*a*, Dakṣasmṛti 18*b*, Vyāsasmṛti 26*a*, Śātātapasmṛti 31*a*, Parāśarasmṛti 36*a*, Yājñyavalkyasmṛti 57*a*.

No. 2620. आपस्तम्बस्मृतिः.

ĀPASTAMBASMṚTIḤ.

Substance, paper. Size, 13 × 8⅛ inches. Pages, 90. Lines, 18 on a page. Character, Grantha. Condition, good Appearance, new.

Complete in 6 Paṭalas.

Beginning:

अध्यात्मज्ञानसंपन्नमापस्तम्बं महामुनिम् ।
अभिगम्य महात्मानः इदमूचुर्मुनीश्वराः ॥

केनोपायेन भगवन् मनुष्यास्सिद्धिमाप्नुयुः ।
तमुपायं समाचक्ष्व शास्त्राण्यालोच्य तत्त्वतः ॥

शृणुध्वमृषयस्सर्वे सर्वधर्मं सनातनम् ।
यत्कृत्वा मनुजास्सर्वे सिद्धिं यान्ति सनातनीम् ॥

तदुपायविधिं वक्ष्ये सर्ववेदार्थसंग्रहम् ।
वर्णानां ब्राह्मणादिनामन्तराणाञ्च सर्वशः ॥

वेदाः प्रमाणं धर्मज्ञसमयश्चापि तद्विदाम् ।
आचारश्च मनःप्रीतिः प्राहुरेतच्चतुष्टयम् ॥

* * * *

Colophon:

इति निवासदेशपटलः ॥

इति द्वितीयपटलः ॥

इति तृतीयपटलः ॥

इति चतुर्थपटलः ॥

इति पञ्चमपटलः ॥

End:

यदि पत्नी विदेशस्था उच्छिष्टा ययधवातता (पतिताथवा) ।
दुरात्तौ(त्मा)नानुकूला च तस्य पिण्डस्य का गतिः ॥
आकाशं गमयेत्पिण्डं जलर्द्धो(स्थो) दक्षिणामुखम् ।
पितृणां स्थानमाकाशं दक्षिणा दिक् तथैव च ॥
तीर्थश्राद्धे तथा पिण्डान् क्षिपेत्तीर्थे समाहितः ।
दक्षिणाभिमुखो भूत्वा पित्र्यं के(ते)न प्रकीर्तितम् ॥

षष्ठः पटलः ॥

अथ कृच्छ्राणि विंशन्ति पित्र्यादीनेतदाशये ।
त्रिंशत्कोटौ भैरवान्तं ग्रहादारभ्य ता दिशः (?) ॥

No. 2621. आपस्तम्बस्मृतिः.

ĀPASTAMBASMṚTIḤ.

Pages, 23. **Lines**, 13 on a page.

Begins on fol. 55*a* of the MS. described under No. 2612.

Incomplete.

Same work as the above.

No. 2622. आपस्तम्बस्मृतिः.

ĀPASTAMBASMṚITIḤ.

Substance, paper. Size, 13 × 8¼ inches. Pages, 68. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

The first 16 leaves contain a record of the historical events in the reign of George I and II, then 12 leaves contain the translation of a Telugu poem called Palnāti Vīra Caritra, and 4 more leaves the translation of another Telugu poem called Sūrya-Tanayā-Pariṇayam.

Begins on fol. 39*a*. The other work herein is, Vasiṣṭhasmṛtiḥ 73*a*.

Breaks off in the 6th Paṭala.

No. 2623. औशनसस्मृतिः.

AUŚANASASMṚTIḤ.

Pages, 40. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 1203.

Breaks off in the 4th Adhyāya.

Beginning:

श्रीमत्तोतगिरेर्मूर्ध्नि श्रीमत्यायतने हरेः ।
द(उ)शनाख्यं व(स)मासीनं प्रणम्य मुनयोऽब्रुवन् ॥
श्रीमदेकायनं शास्त्रं श्रुतं गुह्यं सनातनम् ।
ज्ञातञ्च सर्ववेदानामन्तस्सारमिदन्त्विति ॥
निवृत्तं कर्म यत्प्रोक्तं पृच्छाम भवभेषजम् ।
पञ्चकालात्मकं ज्ञानं तच्च ब्रह्मैकदैवतम् ॥
कुटुम्बाश्रमनिष्ठानां पञ्चकालनिषेविणाम् ।
आचारं त्वन्मुखाम्भोजाच्छ्रोतुमिच्छामहे वयम् ॥
शाण्डिल्योऽपि नमस्कृत्य मङ्गळायतनं हरिम् ।
अब्रवीत्स मुनिश्रेष्ठान् श्रेष्ठकर्मा महामुनिः ॥

बहुशः पूर्वमेवार्य समाचारो मयेरितः ।
पदार्थानधिकृत्यैव शास्त्रे सत्त्वस्थसंस्थितान् ॥
महाविस्ताररूपोऽयमाचारः पञ्चकालिनाम् ।
संक्षेपाच्च ब्रवीम्यद्य यथाशास्त्रं यथामति[:] ॥
रहस्यमेतद्विज्ञानं भक्तानां हितमेव च ।
अप्रमाणमभक्तानां सारं सर्वागमेषु च ॥
कुटुम्बाश्रममाश्रित्य तथा कालक्रमेण च ।
वक्ष्यामि वस्समाचारं मुख्यास्ते हि कुटुम्बिनः ॥
आचारं मङ्गळोपेतं संक्षेपाच्च ब्रवीमि वः ।
अनन्यमनसस्सर्वे शृणुध्वं मुनिपुङ्गवाः ॥
पञ्चेन्द्रियस्य देहस्य बुद्धेश्च मनसस्तथा ।
द्रव्यदेशक्रियाणाञ्च शुद्धिराचार इष्यते ॥
वक्ष्यमाणस्य सर्वस्य श्लोकस्सूत्रोऽयमीरितः ।
संक्षेपविस्ताराभ्याञ्च व्याख्यानमिदमुच्यते ॥
प्रतिषिद्धेष्वसक्तं यत् सक्तं शब्देषु साधुषु ।
भगवद्विषयेष्वेव शुद्धं तच्छ्रोत्रमुच्यते ॥
अस्पृश्यमस्पृशन्ती या स्पृशन्ती स्पृश्यमेव च ।
तत्राप्यलोलुपा साद्रिम(:) त्वक् शुद्धेति निगद्यते ॥

* * * *

Colophon:

इति औशनसधर्मशास्त्रे प्रथमोऽध्यायः ॥

* * * *

इति औशनसधर्मशास्त्रे द्वितीयोऽध्यायः ॥

* * * *

इति औशनसधर्मशास्त्रे तृतीयोऽध्यायः ॥

End:

उपादानप्रकारोऽयं सम्यगुक्तस्समाहितः ।
इज्याचारञ्च वक्ष्यामि यथावदनुपूर्वशः ॥

भोगानुपार्ज्य यागार्थं विधिवत्स्नानमाचरेत् ।
प्रक्षाल्य पाणिपादौ(दं)च स्वाचान्तस्सोर्ध्वपुण्ड्रकः ॥

* * * *

देवानिवेदितैर्दिव्यैस्तर्पयेत्तदसन्निधौ ।
भुक्तं भगवता यद्यत् भुक्तशेषमथापि वा ॥

No. 2624. कण्वस्मृतिः.

KANVASMRTIH.

Pages, 33. Lines, 12 on a page.

Begins on fol. 85*a* of the MS. described under No. 2612.

Complete.

Beginning :

कण्वं नत्वा महाभाग(।) मुनयो ब्रह्मवित्तमाः ।
युगभेदप्रभेदेन सर्वधर्मान् सनातनान् ॥

पप्रच्छुरखिलज्ञप्त्यै लोकानां हितकाम्यया ।
कण्व वेदविदां श्रेष्ठ सर्वलोकहिताय वै ॥

सर्ववैदिककृत्यानां मुख्यामुख्यं गुणागुणम् ।
प्रविभज्य समासेन सुस्पष्टं कथयस्व नः ॥

मुख्यं कल्पममुख्यञ्च गौणं काम्यमियत्तमः(म्) ।
एवमेतत्तथा नो चेत्साध्यासाध्ये च तत्परम् ॥

End :

नित्यस्नानः सदाचारस्सदावह्निरसदा शुचिः ।
सदा तुष्टस्सदा शान्तस्सदासूयाविवर्जितः ॥

अग्निहोत्राद्यभावेऽपि वेदवेदिविवर्जितः ।
ब्रह्ममेधक्रियाशुद्धः पूर्वतुल्यो भवत्यपि ॥

इत्येतदुक्तं कण्वेन मुनिना धर्ममुत्तमम् ।
शास्त्राणां प्रवरं शास्त्रं हिताय जगतां तराम् ॥

Colophon :

इति कण्वस्मृतिस्समाप्ता ॥

No. **2625.** कण्वस्मृतिः.

KANVASMṚTIḤ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 50. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Incomplete.

Begins on fol. 16*b*. The other works herein are : Saṁvartasmṛtiḥ 1*a*, Likhitasmṛtiḥ 8*a*.

Same work as the above.

No. **2626.** दक्षस्मृतिः.

DAKṢASMṚTIḤ.

Pages, 17. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 2613.

Complete.

Beginning :

सर्वशास्त्रार्थतत्त्वज्ञः सर्ववेदविदां वरः ।
पारगस्सर्वविद्यानां दक्षो नाम प्रजापतिः ॥

उत्पत्तिं प्रकृतिञ्चैव स्थितिं संहारमेव च ।
सर्वमात्मनि संपश्येत् आत्मा ब्रह्मण्यवस्थितः ॥
भूतं भव्यं भविष्यच्च जगत्स्थावरजङ्गमम् ।
पुराणन्यायमीमांसा धर्मशास्त्रप्रयोजनम् ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एतेषां तु हितार्थाय दक्षश्शास्त्रमकल्पयत् ॥

जातमात्रशिशुस्तावत् यावदष्टसमावयाः ।
षो(सोऽ)पि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रकाशितः ॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ।
आसीत्कालेन दोषस्य स यावन्नोपनीयते ॥
उपनीते च दोषोऽस्ति क्रियमाणैर्विगर्हितैः ।
अप्राप्यव्यवहारोऽसौ बाल(:) षोडशवार्षिकः ॥
स्वीकरोति यदा वेदं चके(रे)द्वेदव्रतानि च ।
ब्रह्मचारी भवेस्ताप(त्ताव)दूर्ध्वं स्नातो गृही भवेत् ॥
द्विविधो ब्रह्मचारी तु दक्षशास्त्रे प्रपठ्यते ।
उपकुर्वाणकः पूर्वो द्वितीयो नैष्ठिकस्स्मृतः ॥

End:

प्रणवो धनुश्शरं ब्रह्म नैव तच्चक्षुषा ग्रहम् ।
मनसात्मोपदेशेन दृश्यन्ते(ते) सूक्ष्मदर्शिभिः ॥
तत्त्वार्थाद्ज्ञानविज्ञानं विज्ञानात् प्रत्ययं तथा ।
प्रत्ययात् भावशुद्धिस्स्यात् भावनं शुद्धितः परम् ॥
अत्रोपविरते भावे भावमास्थाय भावितम् ।
आत्मसंस्थापनं कृत्वा न किञ्चिदपि चिन्तयेत् ॥

Colophon:

इति दक्षस्मृतिस्समाप्ता ॥

No. 2627. दक्षस्मृतिः.
DAKṢASMṚTIḤ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 47*b* of the MS. described under No. 1203.

Incomplete. A few passages from the Hārītasmṛti, VII Addhyāya, are found added at the end.

Same work as the above.

No. 2628. दक्षस्मृतिः.

DAKṢASMṚTIḤ.

Pages, 17. Lines, 9 on a page.

Begins on fol. 25*a* of the MS. described under No. 2614.

Complete.

No. 2629. दक्षस्मृतिः.

DAKṢASMṚTIḤ.

Pages, 6. Lines, 12 on a page.

Begins on fol. 52*a* of the MS. described under No. 2612.

Complete.

No. 2630. दक्षस्मृतिः.

DAKṢASMṚTIḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 18*b* of the MS. described under No. 2619.

Incomplete.

Same work as the above.

No. 2631. नारायणस्मृतिः.

NĀRĀYAṆASMṚTIḤ.

Substance, palm-leaf. Size, 9¼ × 1¼ inches. Pages, 28. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 37*a*. The other works herein are: Dattātrēyasaṁhitā 1*a*, Prāyaścittānukramaṇikā 20*a*, Saudarśanīprāyaścittaprayōga 33*a*, Bṛhatkauṇḍinyasmṛti 51*a*.

Complete.

Beginning:

एकदा नैमिशारण्ये ब्रह्मर्षिगणसेविते ।
नारायणमहायोगी दू(दु)र्वाससमपृच्छत ॥

भगवन् मुनिशार्दूल सर्वधर्मभृतां वर ।
काले कलियुगे पुण्यधर्मे लुप्ते भुवस्स्थले ॥
सर्वपापप्रशमनप्रायश्चित्तविधिः कथम् ।
पापाः कतिविधाः प्रोक्ताः विस्तरेण वदस्व मे ॥

दुर्वासाः—

नारायण महायोगिन् शृणु विस्तरतो मम ।
कृते युगे चतुष्पादो धर्मो वर्धति वर्धति ॥
त्रेतायुगे तु संप्राप्ते पादहीनो भवेद्वृषः ।
द्वापरे समनुप्राप्ते द्विपादाभ्यां वृष(ः)स्थितः ॥
ततः कलियुगे प्राप्ते पादेनैकेन तिष्ठति ।
ततः कृतो युगः श्रेष्ठः मध्यमस्तदनन्तरम् ॥
अधमो द्वापरयुगः कलिस्स्यादधमाधमः ।
कृते कृते युगे पापे तद्देशं संपरित्यजेत् ॥
त्रेतायां ग्राममात्रन्तु द्वापरे कुलमुत्सृजेत् ।
कलौ युगे विशेषेण कर्तारन्तु परित्यजेत् ॥
कृतत्रेताद्वापरे तु मरणान्ता हि निष्कृतिः ।
कलौ युगे तु संप्राप्ते मरणान्ता न निष्कृतिः ॥
पापा नवविधाः प्रोक्ताः सावधानतया शृणु ।

* * * *

Colophon:

इति नारायणस्मृतौ पापविवरणं नाम प्रथमोऽध्यायः ॥

End:

ततो गङ्गाजले स्नात्वा सेतुदर्शनमेव वा ।
कृत्वा ततः पुनः कर्म कृत्वा शुद्धिमवाप्नुयात् ॥

स्वकर्मपरकर्माहों भवेदेव न संशयः ।
एवं सम्यक्समादिष्टं श्रुत्वा नारायणो मुनिः ॥
विच्छिन्नसंशयो भूत्वा परमानन्दनिर्भरः ।
मेरुपृष्ठमुपागम्य तपश्चर्तुं ययौ मुनिः ॥

Colophon :

इति नारायणस्मृतौ नवमोऽध्यायः ॥

No. **2632.** नारायणस्मृतिः.

NĀRĀYAṆASMṚTIḤ.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 22. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 9, complete.

Begins on fol. 1*a*. The other works herein are: Prāyaścittasārāvali 11*b*, Gautamadharmasūtra 21*a*, Prāyaścittaviṣaya 43*a*, Bṛhatkauṇḍinyasmṛti 47*a*.

No. **2633.** पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Substance, paper. Size, 13 × $8\frac{1}{4}$ inches. Pages, 104. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 40*a*. The other work herein is, Śāṇḍilyasmṛtiḥ 1*a*.

Complete in 24 Adhyāyas.

Beginning :

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

ओम्:—

अथातो हिमशैलाग्रे देवदारुवनाश्रिते ।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥

मनुष्याणां हितार्थाय वर्तमाने कलौ युगे ।
शैचाचारं यथावश्चा(वच्च) वद सत्यवतीसुतं ॥

तच्छ्रुत्वा ऋषिवाक्यन्तु सशिष्योऽप्यर्कसन्निभः ।
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ॥

यद्यहं धर्मतत्त्वज्ञस्तथापि न वदाम्यहम् ।
अस्मिन्युगे मुनिः श्रेष्ठो धर्मस्यास्य पराशरः ॥

ततस्ते मुनयस्सर्वे धर्मतत्त्वार्थकाङ्क्षिणः ।
ऋषिं व्यासं पुरस्कृत्य गत्वा बदरिकाश्रमम् ॥

नानापुष्पसमाकीर्णं फलैः पुष्पैरलंकृतम् ।
नदीप्रस्रवणोपेतं पुण्यतीर्थोपशोभितम् ॥

नानामृगसमाकीर्णं देवतायतनाश्रमैः ।
यक्षगन्धर्वसिद्धैश्च नृत्तगीतरवाकुलम् ॥

तस्मिन् ऋषिसभामध्ये शक्तिपुत्रं पराशरम् ।
सुखासीनं महात्मानं मुनिमुख्यगणाग्रणीः ॥

कृताञ्जलिपुटो भूत्वा व्यासस्तु ऋषिभिस्सह ।
प्रदक्षिणेनाभिवादैस्स्तुतिभिः परि(र्य)पूजये(य)त् ॥

* * * *

Colophon :

इति पाराशर्ये धर्मशास्त्रे प्रथमोऽध्यायः

श्रीपराशरः—

अतः परं प्रवक्ष्यामि शौचाचारङ्कलौ युगे ।
धर्मं साधारणङ्कुर्याच्चातुर्वर्ण्यं क्रमागतम् ॥

संप्रवक्ष्याम्यहं भूयः पाराशर्यप्रचोदितः ।

End:

ओमच्युत जगन्नाथ मन्त्रमूर्ते सनातन[ः] ।
रक्ष मां पुण्डरीकाक्ष क्षमस्वाशु प्रसीद तु ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन[म्] ।
यत्पू(जितं) मया देव परिपूर्णं तद(स्तु ते) ॥

इति विज्ञाप्य देवेशं स्तुत्वा चैव जितन्तया ।
(अखिले)त्यादिभिस्स्तोत्रैः अभिष्टूय श्रियः(पतिम्) ॥

(अनु)यागं ततः कुर्यात् देवदेवस्य सन्निधौ ।

Colophon:

इति पराशरधर्मशास्त्रे उत्तरखण्डे भगवदाराधनविधिर्नाम चतुर्विंशोऽध्यायः ॥

No. 2634. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 68. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Vasiṣṭhasmṛtiḥ 35*a*.

Complete in 24 Adhyāyas.

Same work as the above.

No. 2635. पराशरस्मृतिः.
PARĀŚARASMṚTIḤ.

Pages, 30. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 1217.

4th to the 12th Adhyāya complete. A portion in the beginning of the 4th Adhyāya is wanting.

No. 2636. पराशरस्मृतिः.
PARĀŚARASMṚTIḤ.

Substance, palm-leaf. Size, 15 × 1 inches. Pages, 140. Lines, 5 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Śrautaviṣayaḥ 76*a*.

Complete in 12 Adhyāyas.

Same work as the above.

No. 2637. पराशरस्मृतिः.
PARĀŚARASMṚTIḤ.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 36. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 59*a*. The other work herein is, Smṛtiratnākara 1*a*.

Adhyāyas 1 to 12, complete.

Contains a collection of stanzas from various Smṛtis at the end.

Same work as the above.

No. 2638. पराशरस्मृतिः.
PARĀŚARASMṚTIḤ.

Pages, 8. Lines, 8 on a pages.

Begins on fol. 202*a* of the MS. described under No. 23.

Four Adhyāyas complete.

Same work as the above.

No. 2639. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 44. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Same work as the above.

Breaks off in the 12th Adhyāya.

No. 2640. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Pages, 55. Lines, 8 on a page.

Adhyāyas 1 to 23, complete.

Begins on fol. 15*a* of the MS. described under No. 2616.

No. 2641. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 56. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 24*a*. The other works herein are: Snātakavratakārikā 1*a*, Indrākṣīstōtram 2*a*, Navagraha Yajña 4*a*, Lakṣmīnārāyaṇavratakalpa 19*a*, Mahāsaṅkalpaḥ 52*a*, Śivasaṅkalpānukramaṇikā 55*a*.

Complete in 12 Adhyāyas.

No. 2642. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Pages, 40. Lines, 9 on a page.

Begins on fol. 36*a* of the MS. described under No. 2619.

Breaks off in the 12th Adhyāya.

No. 2643. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Pages, 47. Lines, 9 on a page.

Begins on fol. 55*a* of the MS. described under No. 2614.

Adhyāyas 1 to 11 complete; the 12th almost complete.

No. 2644. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Pages, 60. Lines, 6 on a page.

Begins on fol. 34*a* of the MS. described under No. 928.

Adhyāyas 1 to 12, complete; but the beginning of the first Adhyāya is wanting.

Same work as the above.

No. 2645. पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 21. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 30*a*. The other works herein are, Sālagrāmalakṣaṇa 1*a*, Siddhāntabindu 3*a*, Daśaślōki 29*a*.

Adhyāyas 10, 11, 9. 8, 12 in Prāyaścittakāṇḍa.

No. 2646. पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ—MĀDHAVĪYĀ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 200. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

To the end of Brahmayajñaprakara in the first Adhyaya.

Five leaves at the end contain an index.

By Mādhavāchārya.

Beginning :

वागीशाद्यास्सुमनसः . . . तं नमामि गजाननम् ॥

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थं परं
मज्जन् सज्जनतीर्थसङ्गिनि पुनस्तीर्थस्थलीर्दर्शयन् ।
लब्धामाकलयन् प्रबोधलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकृष्णमव्याहतम् ॥

सत्यैकव्रतपालको द्विगुणधीस्त्यूर्थश्च(र्थी च)तुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढस्सप्ताङ्गसर्वंसहः ।
अष्टव्यक्तिकळाधरो नवनिधिः पुण्यद्दशप्रत्यय-
ख्यातो न्याययुरन्धरो विजयतां श्रीबुक्कणक्ष्मापतिः ॥

इन्द्रस्याङ्गिरसो नळस्य सुगतिश्शैव्यस्य मेधातिथिः
धौम्यो धर्मसुतस्य वैन्यनृपतेस्स्यो(स्स्वो)जा निभेर्गौतमः ।
प्रत्यग्दाष्टररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्य(द्व)त्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः ॥

प्रज्ञामूलमहा(ही)विवेकसलिलैस्सिक्ता बलोपष्निका
मन्त्रैः पल्लविता विशालविटपा सन्ध्यादिभिष्पङ्गुणैः ।
शक्त्या कोरकिता यशस्सुरभिळा सिद्ध्या समुद्यत्फला
संप्राप्ता भुवि नीतिकल्पलतिका सर्वोत्तरं माधवम् ॥

यस्य बोधायनं सूत्रं शाखा यस्य च वै यजुः ।
भारद्वाजकुलं यस्य सर्वज्ञस्स हि माधवः ॥

श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धिसहोदरौ ॥

स माधवस्सकलपुराणसंहिता-
प्रवर्तकस्स्मृतिसुधामपाराशरः ।

परावरोस्मृ(रस्स्मृ)तजगदीहितार्थये
पराशरस्मृतिविवृतौ प्रवर्तते ॥

पराशरस्मृतिः पूर्वैस्समाख्या(ता)निबन्धि(न्धृ)भिः ।
मयातो माधवार्येण तद्व्याख्येयं प्रयत्य(तन्य)ते ॥

ननु नेयं स्मृतिः प्रमाणतामर्हति तत्प्रमाणस्य दुर्निरूपत्वात् . . . . . अस्तु वा कथञ्चन मनुस्मृतेः प्रामाण्यम्; तथाहि (पि)प्रकृतायाः पराशरस्मृतेः किमायातम्? न हि मनोरिव पराशरस्य महिमानं क्वचिद्वेदः प्रख्यापयति । तस्मात्तदीयस्मृतेर्दुर्निरूपं प्रामाण्यमत्रोच्यते—प्रामाण्यस्य स्वतस्स्या(स्सत्त्वा)त् । . . .

* * * *

पराशरस्मृतावस्यां ग्रन्थकृत्सिर्विविच्यते ।
द्वे काण्डे द्वादशाध्यायाः श्लोका अष्टोनषट्शतम् ॥

आचरस्यादिमः काण्डः प्रायश्चित्तस्य चान्तिमः ।
इष्टप्राप्तिरनिष्टस्य निवृत्तिश्चानयोः क्रमात् ॥

एते सर्वे पुण्यलोका भवन्तीति श्रुतिर्जगौ ।
विहितादाश्रमाचारादिष्टा[ष्टि]प्तिः पारलौकिकी ॥

प्रसक्तो नरकानिष्टो निषिद्धाचरणेन यः ।
तन्निवृत्तिस्स्फुटा शास्त्रे प्रायश्चित्ताभिधायिनि ॥

* * * *

किं बहूक्त्यायमाचार्यः परलोकैकदृष्टिमान् ।
व्यवहारन्तु नावोचत् किन्तु सूचितवानमुम् ॥

राजधर्मप्रसङ्गेन क्षितिं धर्मेण पालयेत् ।
इति ब्रुवन्राजकृत्यं व्यवहारमसूचयत् ॥

स्वर्गादिप्राप्तिहेतुत्वादाचारः पूर्वमीर्यते ।
आचारस्यान्यथात्वे तु प्रायश्चित्तगवेषणम् ॥
इहाचारे त्रयोऽध्यायाः प्रायश्चित्ते नवेरिताः ।
* * *
यद्विवेकाय कुर्वेऽहं व्याख्यां पाराशरस्मृतेः ॥

प्रारिप्सितग्रन्थे श्रोतृबुद्धिमनस्समानाथा(धाना)य संबन्धाधिकारिविषयप्रयोजनरूपमनुबन्धचतुष्टयमादौ श्लोकद्वयेनोपनिबध्नाति—

श्लोकः—

अथातो वा(हि)मशैलाग्रे देवदारुवनालये ।
व्यासमेकाग्रमासीनमपृच्छद्दृ(नृ)षयः पुरा ॥
मनुष्याणां हितं धर्मं वर्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुतेति ॥

अथशब्द आनन्तर्यार्थः अनन्तरमपृच्छन्नित्यत्र हेतुं धिया परिकल्प्य.

No. 2647 पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ—MĀDHAVĪYĀ.

Substance, palm-leaf. Size, 22½ × 1¾ inches. Pages. 235. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old

Adhyāyas 4 to 12.

A commentary on the Parāśarasmṛti by Mādhavācāryā. The introductory stanzas generally found in the first Adhyāya are seen annexed to the 4th Adhyāya in this MS.

End:

अस्य शास्त्रस्यानुष्ठानप्रधानत्वात्तत्पापस्य स्वर्ग प्रत्यकिञ्चित्करत्वमाशङ्क्यं ङ्क्य। वेदाध्ययनवत्स्वर्गसाधनत्वमाह—

यथाध्ययनधर्माणि धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिनेति ॥
निगदव्याख्यानमेतत् ॥

Colophon:

इति श्रीमहाराजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां द्वादशोऽध्यायः ॥

No. 2648. पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ—MĀDHAVĪYĀ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 108. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Second Adhyāya, complete.

Colophon:

इति श्रीमद्राजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीबुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां द्वितीयोऽध्यायः ॥

द्वितीयेऽप्यध्याये स्फुटमभिहितो जीवनकृते
रुपायः कृष्यादिः पुनरथ सम(स्ता)श्रमगताः ।
गरीयांसो धर्माः किमपि विवृता(स्त्वा)श्रमपदा-
स्तमेवं व्याकार्षीन्महितधिषणो माधवविभुः ॥

No 2649. पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ—MĀDHAVĪYĀ.

Substance, palm-leaf, (Śrītāla). Size, 18½ × 1¾ inches. Pages, 129. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Yaḷḷajīyam 6 to *a*. The third Adhyāya. By Mādhavaacarya.

End:

नित्यकाम्ययोरेकदेवताकयोस्संपाते काम्येनैव नित्यसिद्धिः । तदुक्तं स्मृतिसंग्रहे—

काम्यतन्त्रेण नित्यस्य तन्त्र(न्त्रं)श्राद्धस्य सिध्यति । इति ।

यत्राशौचविधानमुक्तमहहतस्यार्थस्य युक्त्या दृशा
प्रोक्तं यत्र च संगृहीतवपुषा श्राद्धं समृद्धेः पदम् ।
अध्यायन्तमवां(मिमं)ह्यानिर्णयविदां तार्तीयमार्तिच्छिदं
सोऽयं व्याकुरुत स्वतन्त्रमहिमा मन्त्रीश्वरो माधवः ॥

Colophon:

इति श्रीमहाराजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां तृतीयोऽध्यायः ॥

समाप्तश्च पराशरस्मृतिव्याख्यायामाचारकाण्डः ॥

No. 2650. पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 192. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Third Adhyaya, complete.

Āśauca Kaṇḍa and Śrāddha Kaṇḍa.

The Āśaucakāṇḍa, Śrāddhakāṇḍa and Anukramaṇikā contain 2,238 granthas.

Copying is said to have been begun on the 1st and finished on the [illegible] Kārttika of the year Vibhava.

No. 2651. पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM

Substance, paper. Size, 12¼ × 8¼ inches. Pages, 178. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Vyavahārakāṇḍa complete.

The following statement is found at the end of the book—"Here ends the Vyavahārakāṇḍam of Parāsaramādhavīyam, transcribed by Nārāyana Śetti of Vanapparutti at the instance of Mr. Brown of the College on the 30 Janaury 1816."

Beginning:

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याम्स्युस्तं नमामि गजाननम् ॥

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थं परं
मज्जन् सज्जनतीर्थसङ्गनिपुणः सद्वृत्ततीर्थं श्रयन् ।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम् ॥

सत्यैकव्रतपालको द्विगुणदीत्या धीम्ब्य)र्थी चतुर्वेदिना
पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्ववेदः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुण्यद्दशप्रत्ययः
स्मार्तोच्छायधुरन्धरो विजयतां श्रीवुक्कणक्ष्मापतिः ॥

इन्द्रस्याङ्गी(ङ्गि)रसो नलम्य सुमतिः शंभ्य ब्य)स्य मेधातिथिः
धार्मे(धौम्यो)धर्मसुतस्य वैन्यनृपतेम्वौजा निमेर्गौतमिः ।
प्रत्यक्दृष्टिरुरुन्धतीमहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुः मन्त्री तथा माधवः ॥

प्रज्ञामूलमहो विवेकसलिलैम्सिक्ता वलोपाश्रिका
मन्त्रो पञ्चविधा विधाम्यविटपा सत्यादिभिः पल्लवैः ।

शक्त्या कोरकिता यशस्सुरभिता सिद्ध्या समुद्यत्फला
संप्राप्ता भुवि भाति नीतिलतिका सर्वोत्तरं माधवम् ॥

श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धिसहोदरौ ॥

यस्य बहु(बौ)धायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजकुलं यस्य सर्वज्ञम्स हि माधवः ॥

स माधवस्सकलपुराणसंहिताप्रवर्तकस्स्मृतिसुषुमापराशरः ।
पराशरस्मृतिषु जगद्धितास्वये पराशरस्मृतिविवृतौ प्रवर्तते ॥

व्याख्यातो आचारप्रायश्चित्ते । यद्यप्यृणादानादीनामष्टादशपदानां व्यवहाराणां मध्ये कमपि व्यवहारं पराशरो न व्युत्पादितवान्; तथाप्याचारकाण्डे चतुर्णां वर्णानां क्रमेणाचारान् ब्रुवन्,

"क्षत्रियस्तु प्रजाश्चैव क्षितिं धर्मेण पालयेत् ॥"

इत्यस्मिन्वचने क्षत्रियविशेषस्य राज्ञ आचारविशेषमेवमवोचत् । क्षितिं धर्मेण पालयेदिति तत्र क्षितिपालनं नाम क्षित्याश्रितासु प्रजासु दुष्टानां निग्रहः, शिष्टोपद्रवपरिहारश्च; एतदर्थमेव हि जगदीश्वरस्य रामकृष्णादिक्षत्रियावतारः, तच्च गीतासु भगवता विस्पष्टमभिहितम् ।

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगेयुगे ॥"

इति यथा महतां रावणादीनां शिक्षायै रामाद्यवतारः; तथा क्षुद्राणां चोरादीनां शिक्षायै राजावतार इति द्रष्टव्यम् ।

* * * *

एतच्च सर्वमस्माभिराचारकाण्ड एव राजधर्मानाचक्षाणैः प्रपञ्चितम्। बृहस्पतिस्तु विशेषतः ऋणादानादिव्यवहारविचारणमेव राजोत्पत्तिप्रयोजनमभिप्रेत्य तद्विचारक्षमत्वमु(प)पादयितुमिन्द्राद्यात्मकत्वं राज्ञ उदाजहार। (मू.)

गुणधर्ममतो राज्ञः कथयाम्यनुपूर्वशः ।
धनिकर्णिकसन्दिग्धा(ग्धे) प्रतिभूलेख्यसाक्षिणः ॥
विचारयति यस्सम्यक् तस्योत्पत्तिं निबोधत ।
सोमाग्न्यर्कानिलेन्द्राणां विष्णाप्स(त्ताप्प)त्योर्यमस्य च ॥
तेजोमात्रास्समुद्धृत्य राज्ञो मूर्तिर्विनिर्मिता ।
ततस्सर्वाणि भूतानि स्थावराणि चराणि च ॥
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ।
नाराज्ञि कृषिवाणिज्यं कुसीदपशुपालनम् ॥
तस्माद्वर्णाश्रमाणां तु नेतासौ निर्मितस्सुरैः। इति ॥

लोके हि राजा भूपो नृप इत्येते शब्दा एकार्थवाचित्वेन प्रयुज्यन्ते; तत्र राजशब्दो रूढः, भूपनृपशब्दौ यौगिकौ; भुवनं(वं)पातीति भूपः, नॄन् पातीति नृपः; तथाच भूपालकत्वं, मनुष्यपालकत्वं च गुणः, तत्प्रयुक्तो धर्मो व्यवहारविचारः, स च पूर्वं नाभिहितः; किन्तु वर्णाश्रमधर्मानाचक्षाणेन बृहस्पतिना राजन्यापि क्षत्रियत्ववर्णप्रयुक्तो गृहस्थाश्रमप्रयुक्तश्च धर्मोऽभिहितः; अतः परं भूपत्वगुणप्रयुक्तो व्यवहारविचारात्मको राजधर्मोऽभिधीयते। धनिको धनप्रदाता रु(ऋ)णिकस्तदीयस्य धनस्य ग्रहीता, तयोस्सान्दिग्धे विवादे प्रतिभूः तस्य प्रत्यर्पणं कारयिष्यामीति प्रतिश्रुत्य तदीयस्य भारस्य वोढा.

End:

यमः—

एवन्धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथा क्षयः ॥ इति ॥

मनुरपि—

एवं सर्वानिमात्रजा व्यवहारान्समापयेत् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमाङ्गतिम् ॥

Colophon:

इति श्रीमहाराजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कणभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयाख्यां तृतीयो व्यवहारकाण्डस्समाप्तः ॥

No. **2652.** पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 424. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Vyavahārakāṇḍa, complete.

Copied by Vēṅkatārya, son of Varadārya of Bhāradvājagōtra.

Same work as the above.

यस्सुब्रह्मण्यनामा वै तस्य कोशवरो भवेत् ॥

इति श्रीभारद्वाजकुलतिलकस्य कमलारमणचरणारविन्दद्वन्द्वपरिचर्यापरायणस्य श्रीमद्वरदाचार्यनन्दनस्य श्रीवेङ्कटाचार्यस्य लेखनमिदं समाप्तम्.

No. **2653.** पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM.

Substance, paper. Size, 11½ × 9½ inches. Pages, 196. Lines, 24 on a page. Character, Devanāgarī. Condition, slightly injured. Appearance, old.

Vyavahārakāṇḍa, complete.

Same work as the above.

मृत्युञ्जयदेवशर्मणः पुस्तकमिदं समाप्तम् ।

No. 2654. पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM.

Substance, paper. Size, 13 × 5¼ inches. Pages, 334. Lines, 10 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

The pages are not in order.

Begins with the 4th Adhyāya and breaks off in the 12th.

No. 2655. पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ—MĀDHAVĪYĀ.

Substance, paper. Size, 10⅛ × 4¼ inches. Pages, 325. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Vyavahārakāṇḍa complete.

Begins on fol. 1*a*. The other work herein is, Kālamādhavīyā 164*a*.

Same work as the above.

No. 2656. पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM.

Substance, palm-leaf. Size, 17 × 1⅞ inches. Pages, 351. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Prāyaścittakāṇḍa, complete.

Wants 5 leaves in the beginning.

Copying is said to have been begun on the 5th Mārgali and finished on the 11th Tai of the year Prabhava.

No. 2657. पराशरस्मृतिव्याख्या माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ—MĀDHAVĪYĀ.

Substance, palm-leaf. Size, 14¾ × 1¾ inches. Pages, 510. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

By Mādavācārya.

Adhyāyas 1 to 7 complete ; 8th incomplete.

The introductory passages are omitted.

No. 2658. बार्हस्पत्यस्मृतिः.

BĀRHASPATYASMṚTIḤ.

Pages, 5. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2614.

Beginning:

इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणम् ।
मघवान् वाग्विदां श्रेष्ठं पर्यपृच्छद्बृहस्पतिम् ॥
भगवन् केन दानेन स्वर्गतस्सुखमेधते ।
(किमक्ष)य्यं महार्घ्यं(र्घं) च त्वं ब्रूहि भव(वद)तां वर ॥

End:

पुष्कलानि च चत्वारि आढकः परिकीर्तितः ।
आढकश्चतुरो द्रोणा इत्येवं मानलक्षणम् ॥

Colophon:

इति बार्हस्पत्यस्मृतिस्समाप्ता ॥

No. 2659. बृहत्कौण्डिन्यस्मृतिः.

BṚHATKAUṆḌINYASMṚTIḤ.

Pages, 7. Lines, 9 on a page.

Complete.

Begins on fol. 51*a* of the MS. described under No. 2631.

Beginning:

कदाचिन्मेरुशिखरे विधाय प्रातराह्निकम् ।
अग्निहोत्रमुपासित्वा भ्राजमानं स्वतेजसा ॥

ऋषिमध्ये समासीनं भरद्वाजं महामुनिम् ।
कौण्डिन्यः परिपप्रच्छ लोकानां हितकाम्यया ॥

भगवन् मुनिशार्दूल सर्वधर्मभृतां वर ।
कृतादिषु व्यतीतेषु प्राप्ते कलियुगे प्रभो ॥

सर्वथा शक्तिहीनत्वात् तपश्चर्तुमनीश्वराः ।
ब्राह्मणास्संभविष्यन्ति सदा कल्मषमानसाः ॥

प्रत्यवायान् करिष्यन्ति लोभोपहतचेतसः ।
तत्तत्पापानुसारेण प्रायश्चित्तबहुत्वतः ॥

यस्य पापस्य या प्रोक्ता निष्कृतिः परमर्षिभिः ।
कर्तव्या सैव भगवन् अनन्तत्वाच्च पाप्मनाम् ॥

एककाले कथं शक्या सर्वपापविनिष्कृतिः ।
इति मे संशयः चित्ते महान् दृढमवस्थितः ॥

सर्वज्ञोऽसि महर्षे त्वमिमं सञ्छेत्तुमर्हसि ।

भरद्वाजः—

धन्योऽसि कृतपुण्योऽसि लोकानां हितकाम्यया ॥
यत्पृष्टवानिदं प्रश्नमृषीणां श्रु(श्रृ)ण्वतामिह ।
वक्ष्यामि संग्रहेणेदं श्रु(श्रृ)णुष्व मुनिनन्दन ॥
यत् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।
प्रत्यवायो यदा जातः तदा निष्कृतिमाचरेत् ॥
यदा कालविळम्बस्स्यात् निष्कृतिर्द्विगुणा भवेत् ।
प्रत्यवायी(यि)कृतं कर्म सन्ध्यादिकमनापदि ॥

End :

ततो गङ्गावगाहश्च सेतुदर्शनमेव वा ।
कृत्वा ततः परं सम्यक् जायते स्फटिकोपमः ॥
स्वकर्मपरकर्मार्हो भवेदेव न संशयः ।
एतत् श्रुत्वा तु मुनयः कौण्डिन्यश्च महामुनिः ॥
विच्छिन्नसंशयास्तत्र भरद्वाजं महामुनिम् ।
प्रणिपत्य तपस्तप्तुं(प्तुं) जग्मुरुत्तरपर्वतम् ॥

Colophon :

इति बृहत्कौण्डिन्यस्मृतिस्समाप्ता ॥

No. **2660.** बृहत्कौण्डिन्यस्मृतिः.

BṚHATKAUṆḌINYASMṚTIḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 47*a* of the MS. described under No. 2632.

No. **2661.** बृहत्पराशरस्मृतिः.

BṚHATPARĀŚARASMṚTIḤ.

Substance, paper. Size, 11½ × 5 inches. Pages, 362. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete in 12 Adhyāyas.

Beginning :

व्यक्ताव्यक्ताय देवाय वेधसेऽनन्ततेजसे ।
नमस्कृत्य प्रवक्ष्यामि धर्मान् पाराशरोदितान् ॥
अथातो हिमशैलाग्रे देवदारुवनाश्रये ।
व्यासमेकाग्रमासीनं द्विजाः पृच्छन्ति धार्मिकाः ॥
मनुष्याणां हितं धर्मं वर्तमाने कलौ युगे ।
वर्णानामाश्रमाणाञ्च किञ्चित्साधारणं वद ॥

युगेषु त्रिषु ये प्रोक्ता धर्मा मन्वादिभिर्मुने ।
शक्यन्ते नैव ते कर्तुं वर्णैराश्रमवासिभिः ॥
स पृष्टो मुनिभिर्व्यासो बहुभिः परिवेष्टितः ।
प्रष्टुं जगाम पितरं धर्मान् पाराशरान् ततः ॥
सर्वेषामाश्रमाणाञ्च वरे बदरिकाश्रमे ।
संविवेशाश्रमे तस्मिन् योगीव वेधसस्तनुम् ॥
नानापुण्यजनाकीर्णे फलैः पुष्पैरलङ्कृते ।
नदीप्रस्रवणानेकैः(क) पुण्यतीर्थोपशोभिते ॥
मृगपक्षिभिराकीर्णे देवतायतनावृते ।
यक्षगन्धर्वसिद्धानां नृत्यगीतसमाकुले ॥
तस्मिन्नृषिसभामध्ये शक्तिपुत्रः पराशरः ।
सुखासीनो महातेजा मुनिमुख्यगणावृतः ॥
कृताञ्जलिपुटो भूत्वा व्यासस्तु मुनिभिस्सह ।
प्रदक्षिणाभिवाद्यैव(दै)श्च पराशरमपूजयत् ॥

* * *

तथा स्मरन्ति ते धर्मं कल्पे कल्पान्तरान्तरे ।
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ॥
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ।
तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमम् ॥
द्वापरे यज्ञमेवाहुः दानमेकं कलौ युगे ।
कृते तु मानवा धर्मास्त्रेतायां गौतमस्य च ॥
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ।

* * * *

इति बृहत्पाराशर्ये धर्मशास्त्रे व्यासप्रश्ने शास्त्रसङ्ग्रहोद्देशकथनं नाम प्रथमोऽध्यायः ॥

2nd:

दश द्वादश चाष्टौ वा सप्त षट् पञ्च गश्र(वास्व)यम् ।
दैवके पैतृके वापि श्लोकाश्चाद्या द्विजातिभिः ॥
य इदं शृणुयाद्वापि श्रावयेत्पठ्येदपि ।
स प्रध्वस्ततमस्तोमो ब्रह्मलोकमवाप्नुयात् ॥
त्रिभिश्श्लोकसहस्रैस्तु त्रिभिर्वृत्तशतैरपि ।
पराशरादितं धर्मशास्त्रं प्रोवाच सुव्रत ॥
नमोऽस्तु याज्ञवल्क्याय मनवे विष्णवे नमः ।
गौतमाय वसिष्ठाय नमः पाराशराय च ॥

Colophon:

इति श्रीबृहत्पाराशरे धर्मशास्त्रे सुव्रतप्रोक्तसंहितायां योगोपदेशो नाम द्वादशोऽध्यायः ॥

No. 2662. बृहद्विष्णुस्मृतिः.

BṚHADVIṢṆUSMṚTIḤ.

Substance, paper. Size, 12 × 9¼ inches. Pages, 77. Lines, 21 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Complete in 96 Adhyāyas.

Beginning:

ब्रह्मरात्र्यां व्यतीतायां वि(बु)बुधे पद्मसंलवो(भवः) ।
विष्णुस्सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलानुगाम् ॥
जलक्रीडा(डो)रुविश्रुतं (श्रान्तं) कल्पाहि(दि)षु यथा पुरा ।
वाराहमास्थितो रूपमुज्जहार वसुन्धराम् ॥
वेदपादोरुपद्दंष्ट्रः क्रतुवक्त्रः चितीमुखः ।
अग्निजिह्वो दल(र्भ)केरो (शो) ब्रह्मशीर्षो महातपाः ॥

Colophon:

इति श्रीवैष्णवे धर्मशास्त्रे प्रथमोऽध्यायः ॥

End:

ज्योतिषामपि च ज्योतिः तमसः परमुच्यते ।
ज्ञानज्ञेयज्ञानगम्यं हृदि सर्वमधिष्ठितम् ॥
इति क्षेमं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
महत्त एतद्विज्ञा[ना]य मद्भक्तायोपपद्यते ॥

Colophon:

इति वैष्णवे षष्ठन(ण्ण)वतितमोऽध्यायः ।
इत्येवमुक्ता वसुमती शिरसा जानुभ्याञ्च नमस्कारं कृत्वोवाच ॥

No. 2663. मनुस्मृतिः.

MANUSMṚTIḤ.

Substance, paper. Size, 13 × $8\frac{1}{8}$ inches. Pages, 273. Lines, 19 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in 12 Adhyāyas.

Beginning:

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥
मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन् सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवानाञ्च धर्मान्नो वक्तुमर्हसि ॥
जरायुजाण्डजानाञ्च तथा नन्वो(सस्वे)दजोद्भिदाम् ।
भूतग्रामस्य सर्वस्य उत्पत्तिं प्रलयन्तथा ॥

आचाराणाञ्च सर्वेषां तथा कार्यविनिर्णयम् ।
यथाकालं यथायोगं वक्तुमर्हस्यशेषतः ॥

त्वमेको प्यासि(ह्यस्य) सर्वस्य विधानस्य स्वयंभुवः ।
अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ॥

स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचा तथान् (र्च्य तान्) सर्वान् महर्षीञ्च्छ्रूयतामिति ॥

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥

योऽसावतीन्द्रियग्राह्यस्सूक्ष्मोऽव्यक्तस्सनातनः ।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥

शौ(सोऽ)भिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥

End :

एवं यस्सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन् द्विजः ।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥

Colophon :

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः ॥

इति मनुसंहिता समाप्ता ॥

No. 2664. मनुस्मृतिः.

MANUSMṚTIḤ.

Substance, paper. Size, $12\frac{3}{4} \times 8$ inches. Pages, 244. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 12 Adhyāyas.

Same work as the above.

No. 2665. मनुस्मृतिः.

MANUSMṚTIḤ.

Pages, 183. Lines, 8 on a page.

Begins on fol. 83*a* of the MS. described under No. 2616.

Complete.

Same work as the above.

No. 2666. मनुस्मृतिः.

MANUSMṚTIḤ.

Pages, 101. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 2612.

Complete in 12 Adhyāyas.

Same work as the above.

No. 2667. मनुस्मृतिः.

MANUSMṚTIḤ.

Substance, paper. Size, $12 \times 7\frac{3}{4}$ inches. Pages, 220. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete in 12 Adhyāyas.

Same work as the above.

No. 2668. मनुस्मृतिः.

MANUSMṚTIḤ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 144. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete in 12 Adhyāyas.

Same work as the above.

No. 2669. मनुस्मृतिः.

MANUSMṚTIḤ.

Substance, palm-leaf. Size, 16 × $1\frac{1}{2}$ inches. Pages, 200. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not new.

Complete in 12 Adhyāyas.

Same work as the above.

Copying is said to have been completed on Friday, the third day of Phālguna-Śukla in the year Saumya by Kuppāśāstri son of Subbā-dīkṣitar.

सौम्याब्दे फाल्गुने मासि शुक्लपक्षतृतीयके ।
भृगुवारोत्तराभाद्रे (लि)खितेयं मनुस्मृतिः ॥
अप्पाशास्त्र्यभिधानेन सुब्बयज्वात्मजेन च ।
विदुषाञ्चात्मजानाञ्च ज्ञापनाय हिताय च ॥

No. 2670. मनुस्मृतिः.

MANUSMṚTIḤ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 264. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, not very old.

Complete in 12 Adhyāyas.

Same work as the above.

No. 2671. मनुस्मृतिव्याख्या.

MANUSMṚTIVYĀKHYĀ.

Substance, palm-leaf. Size, 16 × 1¼ and 16¾ × 1⅛ inches. Pages, 406. Lines, 7 on a page. Character, Grantha, and Telugu. Condition, slightly injured. Appearance, new.

Adhyāyas 1 to 11 complete; 12th incomplete.
They are not given in the proper order.
The commentary is by Nanda Paṇḍita.

Beginning :

मनुमेकाग्रमिति । मनुस्स्वायंभुवः । तथाच वक्ष्यति—
स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयदिति ।

एकाग्रमवहितम् । अनेन वक्ष्यमाणेष्वर्थेषु सन्देहराहित्यमभिप्रेतम् । भगवन्निति । न केवलं त्रैवर्णिकानामेव ; किन्तु शूद्राणामपीत्युक्तं सर्वशब्दग्रहणेन । अन्तरप्रभवानां वर्णसंकरजानां धर्मान् विहितानुष्ठान-प्रतिषिद्धवर्जनलक्षणान् । जरायुजेति । भूतग्रामस्य महदादितत्त्वसङ्घस्य । आचाराणामिति । कार्याणां विवादवा(प)दानां यथाकालमवसरे प्राप्ते । यथायोगम् उचितेनोपायेन लक्षणेन प्रतिपा(प)दोक्त्या वेति यावत् । त्वमेक इति । विधीयत इति विधानम् । स्वयंभुवा भगवता विहित-स्याचिन्त्यस्य दुर्ज्ञानस्य अप्रमेयस्यापर्यन्तस्य सर्वस्य प्राणिजातस्य कार्यं धर्मस्तस्य तत्त्वं पं(पा)रमार्थ्यन्तस्यार्थं प्रयोजनमभ्युदयसिद्धि-रूपन्त्वमेको वेत्सि ; तेन भवानेव प्रष्टव्यो नान्य इति । स इति । आर्च्य भवन्त एव सर्वज्ञा इति वाचा सम्भाव्य.

End:

अथ शास्त्रार्थसारत्वेन उपदिष्टयोः परमात्मज्ञानयोगयोरादरातिश-यार्थं ज्ञानन्तावत् प्रपञ्चइ(य)ति सर्वमिति । सदसति कार्ये[कार्य]कारणे चिदाचिति वा सर्वमात्मनि संपश्येत् आत्मनि सर्वमाकाशे वायुमिव स्थितं पश्येदित्यर्थः । नाधर्मे कुरुते मन इत्यनेन ज्ञानस्यानुषङ्गिकं

(फलमु)क्तम् । आत्मैवेति । सर्वदेवता आत्मैव सर्वा देवताः परमात्मनो विभूताः । सर्वमात्मन्य(व)स्थितं सर्वमात्मप(र)तन्त्रमित्यर्थः । पारतन्त्र्यमेवो(त्तरार्धेनोपपादितम्).

No. 2672. मनुस्मृतिस्सव्याख्या.
MANUSMṚTIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1$ inches. Pages, 204. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Wants beginning.

The text begins on fol. 82*a*.

No. 2673. यमस्मृतिः.
YAMASMṚTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 40*b* of the MS. described under No. 1203.

Complete.

Begining :

प्रायश्चित्तीयतां प्राप्य ये नरास्त्वकृतव्रताः ।
तेषां दंसं(ण्डं) व्रतञ्चापि क्रमशश्चोदितं शृणु ॥
स्वयमेव तु यः पापं निवेद्य व्रतमाचरेत् ।
इह कतिचिदतिचिरसमुपचितविविधदुरितावलीमलीमसमनसः परमपुरुषचरणारविन्दवैमुख्यमुषितदर्शनाः सुदर्शनादिधारणे विमन्यन्ते; मन्यन्ते च चोदनालक्षणोऽर्थो धर्मः.

End:

अतस्सिद्धं भगवन्निवेदितेनैव पा(व)नतमेनानादिकालसञ्चितानन्तस्वान्तध्वान्तविध्वंसिना विश्वेषां वैश्वदेवप्राणाग्निहवनपूर्वकं वैश्वानरादिमूर्तेर्भगवतस्समाराधनमनुयागापराभिधानमनुदिनमनुविधेयमिति ॥

श्रीमद्वेङ्कटनाथेन सतामित्थं समर्थितम् ।
पावनं भगवद्भक्तप्रापणादिनिषेवणम् ॥

शमितभवभयानां शङ्खचक्रादिचिह्नैः
दिविषदधिकभूम्नां दीव्यतामूर्ध्वपुण्ड्रैः ।
प्रथितगुणगणानां प्रापणप्राशनाद्यैः
अयमहमनघानामस्मि पात्रं दयायाः ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सच्चरित्ररक्षायां भगवन्निवेदितोपयोगाधिकारस्तृतीयः ॥

No. 2860. सच्चरित्ररक्षा.

SACCARITRARAKṢĀ.

Substance, palm-leaf. Size, 13⅛ × 1¾ inches. Pages, 21. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

The second Adhikāra in Saccaritrarakṣā, dealing in Ūrdhvapuṇḍradhāraṇa.

A work of Vēdāntadēśika.

Beginning :

अथोर्ध्वगतिकामानामूर्ध्वपुण्ड्रस्य धारणम् ।
तिर्यक्पुण्ड्रादिहननं शास्त्रैस्समभि(द)ध्महे ॥
सन्त्यत्र बहूनि श्रुतिस्मृतीतिहासादिवचांसि ।

तत्र तावन्महोपनिषदि—

धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं साङ्ख्ययोगाधिगम्यम् ।
ध्यात्वा विमुच्येत नरस्समस्तैस्संसारपाशैरिह चैव विष्णुम् ॥

सुबालोपनिषदि—

धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं पूज(य)ति स्म भक्त्या ।
अर्घ्यादिभिः पौरुषसूक्तमन्त्रैस्सम्प्राप्नुयात् विष्णुपदं महात्मा ॥

* * * *

यावज्जीवमिदं पुण्यमूर्ध्वपुण्ड्रन्दधाति यः ।
जन्मन्यनन्तरे मुक्तिं सद्यः प्राप्नोति दुर्लभाम् ॥

नारदीये—

सर्वजातिषु यो मर्त्यो विष्णुभक्तो भवेन्मुने ।
तस्योर्ध्वपुण्ड्रकरणे अधिकारो बुधैः स्मृतः ॥

End :

तदयं सङ्ग्रहः—

त्याज्यं विप्रैः त्रिपुण्ड्रादिकमिति कथितं विष्णुभक्तैस्तथान्यैः
कर्माङ्गत्वादिनोर्ध्वग्रहणमिति सदा मृत्प्रशस्तेतरेभ्यः ।
विष्णुक्षेत्रोद्भवा सा सितरुचिरुचितानामिकादेर्विकल्पः
सच्छिद्रं कच्छपान्यद्धरिपदसदृशं मुख्यमन्यूनता च ॥

श्रीमद्वेङ्कटनाथेन श्रुतिस्मृतिशतेरिति(तम्) ।
विधानमूर्ध्वपुण्ड्रस्य सम्यगेतत्समीरितम् ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सच्चरित्ररक्षायामूर्ध्वपुण्ड्राधिकारो द्वितीयः ॥

No. 2861. सच्चरित्ररक्षा.

SACCARITRARAKṢĀ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 2857.

2nd Adhikāra, Ūrdhvapuṇḍravidhiḥ.

No. 2862. सच्चरित्ररक्षा.

SACCARITRARAKṢĀ.

Substance, palm-leaf. Size, $9\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 122. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 3rd Adhikāra.

By Vēdāntadēśika.

Same work as the above.

No. 2863. सच्चरित्रसुधानिधिः.

SACCARITRASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 166. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

A work in Dharma by Vīrarāghavācārya. Said to have been completed on Monday in the month of Mithuna in the year Kālayukti.

Contains a collection of stanzas on Dharmaśāstra at the end from fol. 84*a*.

Beginning:

श्रीशं श्रियं च सेनेशं शठारिं नाथयोगिनम् ।
पद्माक्षं रामामिश्रं च यामुनं च मुनिं ततः ॥
पूर्णं रामानुजमुनिं प्रणतार्तिहरं तथा ।
रामानुजं रङ्गराजं वादिहंसाम्बुदं गुरुम् ॥
वेदान्ताचार्यतत्पुत्रौ प्रणमामि पुनः पुनः ।
ब्रह्मतन्त्रस्वतन्त्रार्यं श्रीमद्वेदान्तदेशिकम् ॥
आद्यं शठारियोगीन्द्रं नारायणमुनिं ततः ।
पराङ्कुशश्रीनिवासशठजिद्योगिपुङ्गवान् ॥
पराङ्कुशशठारातिपराङ्कुशमुनीश्वरान् ।
नारायणशठारातिश्रीनिवासमुनीश्वरान् ॥
श्रीमन्नारायणमुनिं श्रीनिवासमुनीश्वरम् ।
अहोबिलनृसिंहाख्यान्गौरवान्नौमि देशिकान् ॥
श्रीनिवासमहामुनिं वर[द]देशिकं जनकात्मजा-
राघवौ पितरौ स्वकौ बहु सम्प्रणम्य जगत्प्रभू ।
वीरराघवनामवानिह [स]नैध्रुवं(वः) कुरुतेऽधुना
सच्चरित्रसुधानिधिं रघुवीरचोदित आदरात् ॥
आचाराणामपूर्णोक्तैर्मनुबोधायनादिभिः ।
स्मृतिरत्नाकरादीनामत्यन्तं विस्तृतत्वतः ॥
तत्र तत्रोदितानर्थान् सर्वानेकत्र वीक्षितुम् ।
क्रियतेऽद्यावमारम्भस्तत्प्रीणातु रघूद्वहः ॥
धर्मशास्त्राणि सर्वाणि सम्यग्वीक्षितुमक्षमाः ।
पश्यन्तु साधवः कृत्स्नं सच्चरित्रसुधानिधिम् ॥

* * * * *

प्रोच्यतेऽनुक्रमाद्यस्मिन् सच्चरित्रसुधानिधौ ।
परिभाषेन्द्रियादीनां संशुद्धिर्गुणवर्णनम् ॥

तल्लक्षणान्यष्टकालपञ्चकालविभागता ।
ब्राह्मे मुहूर्ते कर्तव्यं विण्मूत्रोत्सर्गशौचयोः ॥

विधिराचमनस्यापि निमित्तान्यथ तस्य च ।
दन्तशुद्धिस्नानविधिरूर्ध्वपुण्ड्रविधिस्ततः ॥

* * * *

तत्र तत्रोपयोगार्थं परिभाषात्र वर्ण्यते ।
नोक्तो हस्तो यत्र तत्र दक्षिणः परिकीर्तितः ॥

यत्र दिङ्नियमो नोक्तः प्राची तत्रोत्तराथ वा ।
तयोरुपाया वै शान्तीर्जुहोतीत्यत्र वै घृतम् ॥

End:

एवंव्रतास्स्त्रियो यास्स्युर्विधवास्सधवा अपि ।
सर्वपापविनिर्मुक्ताः प्राप्नुवन्ति परं पदम् ॥

स्त्रीणां धर्मास्त्वेवमुक्ता यथामति मयाधुना ।
एते समीक्ष्य कर्तव्यास्स्त्रीभिरिष्टफलप्रदाः ॥

सषोडशशतश्लोकैर्द्विचत्वारिंशता युतैः ।
मयैवमधुनाकारि सच्चरित्रसुधानिधिः ॥

सत्रिंशद्भिर्नवशतैः कृतोऽभिगमनक्रमः ।
उपादानविधिः पञ्चत्रिंशद्युक्तशतेन तु ॥

त्रिशतेन सविंशत्या श्लोकैरिज्याविधिः कृतः ।
स्वाध्यायविधिरप्युक्तः द्विषष्ट्या श्लोकतल्लजैः ॥

पञ्चचत्वारिंशश्लो(च्छ्लो)कैर्योगस्सम्यगुदीरितः ।
सपञ्चाशच्छतश्लोकैः स्त्रीधर्मः परिकीर्तितः ॥

Colophon:

वत्सरे कालयुक्त्याख्ये युग्मे मासीन्दुवासरे ॥
समाप्तः श्रीरामतारे सच्चरित्रसुधानिधिः ॥
नैध्रप(ध्रुव)श्रीनिवासार्यसूनुना समकारयत् ।
ब्रह्मरुद्रमुखा(मरा)धिपवन्दितेन दयालुना
वीरराघवहृद्गतेन रघूद्वहेन सुबोधितम् ।
नैध्रपा(ध्रुवा)न्वयसम्भवेन सदङ्घ्रिपङ्कजसेवता(विना)
श्रीनिवासमुनीश्वराङ्घ्रिसरोजयुग्मषडङ्घ्रिणा ॥
वीरराघवनामधेयवताखिलस्मृतिसङ्ग्रहं
पुस्तके लिखितं यथामति सच्चरित्रसुधानिधिम् ।
पञ्चकालपरायणाः श्रुतिधर्मशास्त्रविशारदाः
वीक्ष्य साधु(धु) मुदं भजन्त्वनसूयवस्समबुद्धयः ॥
निग[म]ळैर्मलयैर्नेत्रगानैः प्रीतैश्शुभाननैः ।
नामपानैः प्रणीतोऽभिगमनादिविधिर्मुदे ॥
प्रमेऽब्दे मासि गानज्ञे सेनातारे प्रवासरे ।
श्लोकैः कृतो रविचयैस्सच्चरित्रसुधानिधिः ॥

अभिगमनश्लोकाः	....	....	....	९३०.
उपादानश्लोकाः	....	....	....	१३५.
इज्याश्लोकाः	....	....	....	३२०.
स्वाध्यायकालनिमित्तश्लोकाः		....	....	६२.
योगश्लोकाः	....	....	....	४५.
स्त्रीधर्मश्लोकाः	....	....	....	१५०.
		(आहत्य) श्लोकाः	....	१६४२.

No. 2864. सच्चरित्रसुधानिधिः.

SACCARITRASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 168. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

No. 2865. सच्छूद्राह्निकम्.

SACCHŪDRĀHNIKAṂ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 18. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Treats of the daily duties of a good Śūdra.

Complete.

Begins on fol. 10*a*. The other works herein are, Prapannasapiṇḍīkaraṇanirāsakarūpakam 1*a*, Sacchūdrasatkarmadarpaṇam 19*a*, Sacchūdrasatkarmacandrikā 33*a*.

Beginning:

शूद्राणामभिगमनोपादानयि(इ)ज्यास्वाध्याययोगाः पञ्च कालाः।

अथाभिगमनम्—

रात्रौ चतुर्थयामे निद्रां त्यक्त्वा, हरिर्हरिरिति सप्तहरिसङ्कीर्तनं कृत्वा, गजेन्द्रमोक्षणं, वैष्णवस्तवं, संस्कृतगाथाः, द्राविडगाथाः, वीणागानसमायुक्ताः ताळमद्दळसंयुताः शुभा हरिप्रबोध(धि)कीः पठेत्।

ततश्चोदिते सूर्ये नदीवापीतटाकपुष्करिण्यादिकं गत्वा, शुद्धदेशे स्नानसम्भारं निधाय, सूत्रमस्ति चेत् निवीतं कर्णे निधाय, निर्ऋतिदेशे दिवासन्ध्ययोरुदङ्मुखः, रात्रौ चेत् दक्षिणामुखः, मूत्रपुरीषे विसृज्य, गृहीतशिश्नश्चोत्थाय, मृत्तोयैस्तीरं संशोध्य, दक्षिणकरेण मणिबन्धात्परतः तीर्थे मृदमादाय, दक्षिणतो न्यस्य.

End:

ततो वह्निहोमं कृत्वा भगवन्तं समर्चयेत् ।
निवेद्य हविराद्यन्तु भुक्त्वाचम्य यथाविधि ॥
कालक्षेपञ्च कुर्वीत भगवन्नामकीर्तनात् ।
हृदम्बुजे समासीनं भगवन्तं विचिन्तयेत् ॥
तत्पादमूले स्वशिरः संस्थाप्य स्वापमाचरेत् ।
एवं प्रतिदिनं कुर्यात् शूद्रवैष्णवसत्तमः ॥
सात्त्विकत्यागं कृत्वा योगं समापयेत् ॥

No. 2866. सदाचारविधिः.

SADĀCĀRAVIDHIḤ

Substance, palm-leaf. Size, $9\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 6 Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Anubhāṣya 4*a*.
By Ānandatīrtha.
Incomplete.

सदाचारस्मृतिस्तोत्राणि—

यस्मिन् सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशो निर्ममो योऽरिपदं जयति सोऽच्युतः ॥

स्मृत्वा विष्णुं समुत्थाय कृतशौचो यथाविधि[:] ।
धौतदन्तः समाचम्य स्नानं कुर्याद्विधानतः ॥

उद्धृतेति मृदालिप्य . . . द्विषडक्षरैः ।
त्रिर्निर्मृज्याप्यसूक्तेन पो(प्रो)क्षयित्वा पुनस्तथा ॥

End:

तमेवं विद्वानमृत इव(ह) भवति । नान्य(:) पन्था अयनाय विद्यते ।

Colophon:

आनन्दतीर्थमुनिना व्यासवाक्यसमुद्धृतः(ताः) ।
सदाचारस्य विष(ध)यः कृता(ः) सङ्क्षेपतः शुभा(ः) ॥

No. **2867.** सदाचारविधिः.
SADĀCĀRAVIDHIḤ.

Substance, plam-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 133. Lines 6 on a page. Character, Nandināgarī. Condition, injured Appearance, old.
Incomplete.

Beginning:

ब्राह्मे मुहूर्ते तत्त्वानि(चोत्थाय) चिन्तयेदात्मनो हितम् ।
गुरुं विष्णुं नमस्कृत्य मातापित्रोस्तथैव च ॥
उपवीतं पृष्ठतः कृत्वा कुर्यान्मूत्रपु(री)षकौ(के) ।

यद्वा—

दिवा सन्ध्यासु कर्णस्थो(स्थ)ब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्रपुरीषादौ(षे तु) रात्रौ चेद्दक्षिणामुखः ॥
नग्नौच(ग्नश्च) गच्छन् तिष्ठन्(वा) रथ्यातीर्थे श्मशानके ।
अङ्गारगोमये नद्यां यज्ञभूमिषु सर्वदा ॥
* * * *
स्थानेष्वेतेषु सर्वेषु कुर्यान्मूत्रादिना(कं) न च ।

End:

आश्वयुक्चैत्रपुष्ये तु भूतले मूलमाश्रितः ॥
मार्गे भाद्रपदे ज्येष्ठे फाल्गुने मूलमम्बरे ।
कार्त्तिक्यां श्रावणे माघे वैशाखे च रसातले ॥
स्वर्गलोके भवेद्राजन् धनं पातालमेव च ।
अशुभं मृत्युमाप्नोति भूतले च न संशयः ॥
नारोपणं न ह्यवरोपणञ्च उत्पत्तिरेवं विधुरानलस्य ।

उद्धृत्य वह्निं प्रणवेन पूर्वमन्वङ्ग(ग्नि)मन्त्रेण हरेः पुरस्तात् ॥
निधाय पृष्ठो दिवि मन्त्रकेण ततश्च हुत्वा शकलैश्चतुर्भिः ।
तत्सवितुः, ता॒सवितुः, विश्वानि नो अद्य, इमेति(ऽग्नि) मन्त्राः ॥

No. 2868. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 180. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 2821.
Treats of the morning, noon and evening prayers.
This work specially pertains to Sāmavēdis.
Complete.

Beginning:

त्रिराचम्य, प्राणाय(ा)मत्रयं कृत्वा, प्रात(र्)सन्ध्यामुपासयि(सि)ष्ये । अ(आ)पो हि ष्ठेत्य(ा)दिमन्त्रस्य सिन्धुद्वीप ऋषिः, गां(गाय)त्री छन्दः, अप्छब्दवाच्यनारायणो देवत(ा), प्रोक्षणे विनियोगः । आचम्य अहश्चेत्यादिमन्त्रस्य.

End:

सूतके मृतके चैव सन्ध्याकर्म न सन्त्यजेत् ।
म(न)सोच्चारयेन्मन्त्रा(न्) प्राणाया(म)स्स्मृतो द्विज[ः] ॥
उन्मत्तो दोषयुक्तश्च व्याधियुक्तस्तथैव च ।
पिता भ्राता तथान्ये व(न्यो वा) सन्ध्यावन्दनमाचरेत् ॥

No. 2869. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 22. Lines, 4 on a page.

Begins on fol. 8*a* of the MS. described under No. 2847.
This pertains to the Āśvalāyana followers.
Complete.

No. 2870. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 18. Lines, 24 on a page.

Begins on fol. 166*a* of the MS. described under No. 22.
This relates to the followers of the Ṛgvēda.
Complete.

Beginning :

ऋग्वेदप्रातस्सन्ध्यावन्दनम्—

आचम्य, पृथिव्या मेरुपृष्ठ ऋषिः, कूर्मो देवता, सुतलं छन्दः, आसने विनियोगः । प्रणवस्य परमेष्ठी परब्रह्म ऋषिः, परमात्मा देवता, दै(दे)वी गायत्रीच्छन्दः, प्राणायामे विनियोगः । ओं भूः । . . भूर्भुवस्सुवरोम् । मम उपात्तदुरितक्षयद्वारा श्रीलक्ष्मीनारायणप्रीत्यर्थं प्रातस्सन्ध्यामुपासिष्ये । आपो हि ष्ठेति त्रयाणां मन्त्राणां सिन्धुद्वीप ऋषिः, आपो देवता, गायत्री छन्दः, मार्जने विनियोगः । आपो हि ष्ठा मयोभुवः ।

End :

उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञानं गच्छ देवि यथासुखम् ॥
श्री गच्छ देवि यथासुखमोन्नम इति ।

* * * *

स्तुतो मया वरदा वेदमाता
प्रचोदयन्ती पवने द्विजाता ।
आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं
मह्यं दत्वा प्रजातं ब्रह्मलोकम् ॥

* * *

वासनात् वासुदेवस्य वासितं ते जगत्त्रयम् ।
सर्वभूतनिवासोऽसि श्रीवासुदेव नमोऽस्तु ते ॥

आचम्य ।

कायेन वाचा मनसेन्द्रिया(यै)र्वा
बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
श्रीमन्नारायणायेति समर्पयामि ॥

सर्वं श्रीकृष्णार्पणमस्तु ॥

No. 2871. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Substance, palm-leaf. Size, 11¼ × 1½ inches. Pages, 12. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Mahānyāsaḥ 7*a*.

Almost complete.

This is for Āndhra brahmins of Āpastamba Śākha.

Beginning:

ओं भूः । ओं भुवः । ओं सुवः । ओं महः । ओं जनः । ओं तपः । ओं सत्यम् । ओं तत्सवितुर्वरेणियम् । भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् । आपो हि ष्ठा मयोभुवः.

End:

कितवासो यद्रिरिपुः न दिवि यद्वा घा सत्यमुत यन्न विद्म सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः । प्रतीच्यै दिशे नमः ॥

No. 2872. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 2841.

This also for Āndhra Āpastambīs.

Complete.

No. 2873. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 83*a* of the MS. described under No. 217

Incomplete.

Beginning:

केशव नारायण माधव गोविन्द विष्णु मधुसूदन त्रिविक्रम वामन श्रीधर हृषीकेश पद्मनाभ दामोदराय नमः; सङ्कर्षण वासुदेव प्रद्युम्न अनिरुद्ध पुरुषोत्तम अधोक्षज नारसिंह अच्युत जनार्दन उपेन्द्र हरे[:] श्रीकृष्णाय नमः। उत्तिष्ठन्तु भूतपिशाचाः ये ते भूमिभार . . . . तेषामविरोधेन ब्रह्मकल्म(र्म)समारभे।

ओं भूः, ओं भुवः, ओं सुवः.

End:

चित्रं देवान(ा)मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः(:)। याः (आ) प्रा द्याव(ा)पृथिवी अन्तरिक्षं सूर्य.

No. 2874. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Substance, palm-leaf. Size, 9¼ × ⅝ inches. Pages, 16. Lines, 5 on a page Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Adapted for the followers of Āpastambasūtra. The procedure laid down in this MS. specially refers to the manner in which a Śrīvaiṣṇava performs the Sandhyāvandana.

No. 2875. सन्ध्यावन्दनमन्त्रऋषिछन्दोदेवता.

SANDHYĀVANDANAMANTRARṢICHANDŌDĒVATĀ.

Pages, 6. Lines, 7 on a page.

Begins on fol 1*a* of the MS. described under No. 2820.

Complete.

No. 2876. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 25.

Complete.

A commentary by Nārāyaṇapaṇḍita, the author of 60 works. Copying is said to have been finished on Monday the 9th day of the bright fortnight in the month of Mīna in the year Ānanda.

Beginning:

पुण्डरीकासनासीनं पाण्डराभ्रेन्दुसन्निभम् ।
अखण्डबोधजनकं हयग्रीवमुपास्महे ॥

नमामि शठजिद्योगिचरणाम्बुरुहं हि मे ।
यत्प्रसादेन वेदार्थः हस्तामलकतां गतः ॥

आपो हि ष्ठादिमन्त्राणां व्याख्यास्सन्ति सहस्रशः ।
तत्र्यन्तार्थानुसारेण व्याख्येयं क्रियते मया ॥

आपो हि ष्ठादिमन्त्राणां सिन्धुद्वीप ऋषिः, गायत्रीच्छन्दः, आपो देवता, प्रोक्षणे विनियोगः । आपो हि ष्ठादिमन्त्राणां श्रीपाञ्चरात्रादि-सच्छास्त्रेषु परमात्मा देवतेत्यभिधानात् अत्र देवताशब्दाः परमात्मनारायणवाचकाः । अतः अन्यतरया प्रतीयमानानां नामरूपव्याकरणश्रुत्या

परमात्मपरत्वं वेदान्ते निष्कृष्टम् । आपो हि ष्ठा मयोभुवः । हे आपः यूयं मयोभुवस्स्थ हि । सर्वस्य प्राणिजातस्य सुखभुवः । यच्छिवन्तन्मय इति मयश्शब्दस्य सुखसाधनवाचित्वात् तत्कार्यस्य तच्छब्देनाभिधानमत्र द्रष्टव्यम् ।

End:

सर्वा ता विष्य ।

सर्वाणि तानि विशिष्य मोचय । शिथिरेव शिलाशिथिलानीव हे देव वरुण । अथ अनन्तरम् । ते तव । प्रियासः प्रियाः स्याम । त्वया सर्वपापमोक्षे कृते निर्मुक्तसमस्तबन्धा वयम् ।

"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।"

इतिवत् उत्तरोत्तरं तव प्रीतिवर्धकाः त्वदिच्छानुविधायिनः । त्वत्स्वरूपरूपगुणविभवाद्यनुभवैकरसा भवेम इत्यर्थः ॥

Colophon:

षष्टिप्रबन्धनिर्माता शठकोपमुनीशितुः ।
दासो नारायणमुनिः नित्यमन्त्रानुदश्चयत् ।

अन्वयस्तु—

यो देवस्सवितास्माकं धियो धर्मादिगोचराः ।
प्रेरयेत्तस्य यद्भर्गः तद्वरेण्यमुपास्महे ॥

अन्यत्र—

देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात् ।
प्रचोदयात्तद्वरेण्यं धीमहीत्यन्वयः क्रमात् ॥

आनन्दाब्दे मीनशुक्लनवम्यामिन्दुवासरे ।
इदं सन्ध्यामन्त्रभाष्यं व्य[ा]गाददितितारके ॥

No. 2877. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Pages, 17. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 1840.

To the end of the commentary for the Mantra Āpōhiṣṭā.

By Nārāyaṇapaṇḍita.

Incomplete.

No. 2878. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Substance, palm leaf. Size, $17\frac{3}{4} \times 1\frac{3}{4}$ inches. Pages. 19. Lines, 7 on a page. Character, Grantha Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are, Pramāṇasaṅgraha 11*a*, Aṣṭākṣaramantrārthavivaraṇa 22*a*.

By Nārāyaṇapaṇḍita.

Complete.

No. 2879. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 219. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

The commentary is called Nirṇayakalpavalli by Kṛṣṇapaṇḍita.

Copying is said to have been completed on Wednesday the 2nd of Phālguna Śuddha of Pramōdūta. Copied by Anantayya from the book of Venkaṭakṛṣṇa.

No 2880. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Pages, 52. Lines, 4 on a page.

Begins on fol. 63*a* of the MS. described under No. 861.

Complete.

Beginning :

आपः पुनन्तु पृथिवीम् । आपः पृथिवीं पुनन्तु । पृथिवीशब्दः पृथिव्यादिपञ्चमहाभूतोपलक्षणः । तेन तत्सङ्घातरूपानुष्ठातृपरिग्रहात् देह उपलक्ष्यते ।

End :

लोहिताक्षः अतरुणतरणिकिरणत(णान्त)रपुरुष उच्यते । पुण्डरीकाक्षं(क्षः) विपश्चित् सर्वज्ञोऽन्तरात्मा भूत्वा सरतीति सूर्यः सूर्यात्मको नारायण इत्यर्थः । मनसा अनुग्रहेण । पुनातु स्वपरिग्रह्योग्यं स्वय मेव करोती(त्वि)त्यर्थः । यश्च सर्वकर्मसु अधिकारिणं करोतीत्यर्थः ॥

Colophon :

इति त्रिकालसन्ध्यावन्दनभाष्यं समाप्तम् ॥

No. 2881. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Substance, paper. Size, $8\frac{3}{4} \times 5\frac{3}{5}$ inches. Pages, 53. Lines, 9 on a page. Character, Grantha. Condition. good. Appearance, new.

Begins on fol. 21*a*. The other works herein are—Gurvaṣṭaka 1*a*, Śṛṅgagiriguruparamparā 2*a*, Śṛṅgagirigurucaritram 14*b*.

Complete.

Beginning:

ओं सूर्यश्च मा मन्युश्च मन्युपतयश्च ।

यः स्वस्मिन् सङ्क्रान्तांमावुपक्रान्तस्याह्नोऽधिपतिः सूर्यनामा मण्डलान्तर्वर्ती देवः ; तदधीनत्वादह्नि करिष्यमाणानां सर्वव्यापाराणामिति तद्विषयप्रार्थना । मन्युः क्रोधः ; तदधीनत्वात् हिंसादिपापप्रवृत्तेरिति तद्विषयप्रार्थना । मन्युः क्रोधः पतिर्नियोजको येषां तानीन्द्रियाणि मन्युपतयः ; तैश्चक्षुरादीन्द्रियपुळिशै(न्दै)ः विषयदुरन्तसूनास्थानेषु स्वस्याकर्षणाभावाय तद्विषयप्रार्थना । सर्वत्र चकाररसमुच्चयार्थः ॥

End:

विश्वानि वयुना(नि) पापानि विद्वान् जानन् त्वमेनः पापम् अस्मत् अस्मत्तः युयोधि अपनय । यु पृथग्भावे लोट् । बहुळं छन्दसीति शपो लुक् । वाच्छन्दसीत्यपित्त्वाभावे गुणः । कीदृशमेनः जुहुराणं कुटिलस्वभावम् । तदर्थं वयमपि ते तुभ्यं भूयिष्ठां बहुळतमां नमउक्तिं विधेम क्रियास्म । विधिव(र्वि)धाने आशिषि लिङ् ॥

Colophon:

इति सन्ध्यावन्दनभाष्यं समाप्तम् ॥

No. 2882. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHAṢYAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 30. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 51*a*. The other works herein are—Ṣaṭkarmacandrikā 1*a*, Viṣṇusahasranāmastōtra 66*a*, Sālagrāmalakṣaṇam 73*a*.

A commentary on the Ṛgvēdasandhyāvandanamantra.

Incomplete.

Beginning:

अथ सन्ध्यावन्दनमन्त्राः कथ्यन्ते ।

सेसथत्रयमाकाशे वरवत्रयमस्तके ।

ननन्त्रीणि पादौ च शेषं शिरसि मार्जयेत् ॥

त्रिसन्ध्यामार्जने आपो हि ष्ठेति नवर्चस्य सूक्तस्याम्बरीषः सिन्धुद्वीपस्त्वापस्त्रिशिरा वामदेव ऋषिः, आपो देवता, गायत्रीच्छन्दः (अ)न्ते द्वे अनुष्टुभौ पञ्चमी वर्धमाना सप्तमी प्रतिष्ठा । हि यस्मात्कारणात् । हे आपः यूयं मयोभुवः सुखस्य भावयित्र्यः स्थ भवत ।

End:

तत्र दृष्टान्तः । नावेव सिन्धुम्—यथा कश्चित्कर्णधारः ग्राहादिभिः दुष्टसत्त्वैराकुलितां नदीं नावा अतितारयति तद्वत् । तथा दुरिता दुरितानि दुःखहेतुभूतानि पापानि अग्निः अतिपारयतु । दुःखहेतुभूतात्पापात् अस्मान् उत्तारयत्वित्यर्थः ।

अत्र निरुक्तम्—

वेदादकस्माज्जातानि वेदजातानि वैनं विदुः । जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञो वा यत् तज्जातः पशून् विन्दतीति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणमित्यादि । जपानन्तरम् ॥

No. 2883. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Substance, paper. Size, $6\frac{7}{8} \times 4\frac{1}{8}$ inches. Pages, 20. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Mahālakṣmyaṣṭōttaraśata 11*a*.

Incomplete.

By Tirumalayajvā.

Beginning:

सन्ध्यावन्दनमन्त्राणां वेदभाष्यानुसारतः ।
क्रियते बालबोधार्थं भाष्यं तिर्मलयज्वना ॥

प्राणाययमन्त्रमाह—ओं भूरिति । भूलोकादिन्य(द्य)भिमानिन्यो देवताः प्रणवार्थब्रह्मैक्येन स्तूयन्ते । एता देवता मया कृतमाह्निकमनुजानन्तु इति अत्र तात्पर्यम् । अवतीत्यो(त्यों) ओं ब्रह्म । भूलोकाद्यभिमानिनि(नी) देवता ओं ब्रह्मैव । अथवा ताः भूः भूलोकाद्यभिमानिदेवताः सन्ध्यावन्दनादिकं मया कृतं ओम् अनुजानन्तु । ओमित्यङ्गीकारे । एवमुत्तरत्र योज्यम् ।

End:

अचित्ति अज्ञानेन चरामः कुर्मः । किञ्च यदपि तव धर्मं त्वदीयं कर्म युपोपिम नाशयामः । हे देव तस्मादेनसः द्रोहात्कर्मनाशात् च नः अस्मान् मा रीरिषः हिंसां मा कृथाः । कितवासः धूर्तसमानाः । स्वार्थसाधनपराः । ऋत्विजः यत्कर्माङ्गं रिरिपुः नाशितवन्तः । न दिवि न तु दिने सम्यग्व्यवहृतौ न प्रावर्त(न्त).

No. 2884. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Pages, 12. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 432.

By Vidyāraṇya

Contains also the method of doing Ācamana, Prāṇāyāma, etc.

Complete.

Beginning :

आ ब्रह्मलोकादा शेषादा लोकालोकपर्वतात् ।
ये वसन्ति द्विजा देवाः तेभ्यो नित्यं नमो नमः ॥

अथ कर्तव्यान्याचमनलक्षणान्युच्यन्ते ।

केन ? ग्रन्थकर्त्रेति शेषः ।

जलमध्ये वामकरे दक्षे गोकर्णवत् करे ।
आदौ गुरून्नमस्कृत्य पश्चादाचमनं चरेत् ॥

अङ्गुलित्रयसंयुक्तं मुक्ताङ्गुष्ठकनिष्ठकम् ।
गोकर्णाकृतिरित्याहुः ब्रह्मकर्म प्रकीर्तितम् ॥

End :

कितवासो यद्रिरिपुः न दिवि ।

हे देव कितवासः आक्षिकाः द्यूतकारा इत्यर्थः । दिवि देवनेन रिरिपुः धर्मच्छेदमकुर्वाण(र्व)न् यथा तथा वयं यत्किञ्चित्कुर्म इति यत्; किञ्च यद्वा घा तस्य(सत्य)मुत यन्न विद्म । यद्वा इति पक्षान्तरवाचि । घेति पादपूरणे । सत्यं [यथावर्णः यथा विक्रमं बोधि] धर्मस्य तत्त्वं न विद्म[:] न जानीमः । इत्येवमस्माभिः बहुकृतान्येनांसि । सर्वा ता विष्य शिथिरेव देव । हे देव ता तानि सर्वा सर्वाणि एनांसि विष्य असत्सकाशाद्विसृज । शिथिरा शिथिलानि कुरु । इवेति वाक्यालङ्कारे । अथा ते स्याम वरुण प्र(प्रि)यासः । हे वरुण अथ एवं भवत्सङ्कल्पनानन्तरं ते तव प्रियासः प्रिया(:) स्याम ॥

Colophon :

इति विद्यारण्यकृतं सन्ध्यावन्दनभाष्यं सम्पूर्णम् ॥

No. 2885. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM

Substance, palm-leaf. Size, 17⅞ × 1½ inches. Pages, 96. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 4 Gucchas.

A commentary by Kṛṣṇapaṇḍita, son of Rāmabhaṭṭa and Lakṣmī and a descendant of Rāghavadaivajña.

Beginning:

यस्मिन् दर्पणबिम्बजृम्भितपुरीसन्दर्भतुल्यं जगत्
भान्तं यत्परसंविदो यत इदं रूप्यादिवल्लीयते ।
यस्याज्ञानविजृम्भिता परभिदा वारीन्दुभेदादिवत्
तं भूमानमुपास्महे हृदि सदा वामार्धजानिं शिवम् ॥

पूर्णानन्दस्वरूपाय दक्षिणामूर्तये नमः ।
प्राज्ञान् प्राज्ञान् करोमीति दीक्षिता यस्य चिन्तया ॥

मुकुन्दाश्रमयोगीन्द्रपादपङ्कजमाश्रये ।
यत्सन्दर्शनमात्रेण प्राय(पाण्डि)त्यं जायते नृणाम् ॥

श्रीमत्कटाक्षेक्षणवीक्षितानां वाणी सुवाणी रसनाश्वे(ले)ला ।
प्रवर्तते तान् प्रणमामि नित्यं श्रीकृष्णविद्वन्मणिदेशिकेन्द्रान् ॥

अरुन्धतीव व्रतभाग्यशालिनी लक्ष्मीरभून्मे जननी जनस्तुता ।
श्रीरामभट्टस्तु पितामितागमः तावद्य वन्दामि सदेष्टसिद्धये ॥

श्रीमद्राघवदैवज्ञवंश्यः श्रीकृष्णपण्डितः ।
प्रकाशयाम्यहं स्पष्टं सन्ध्यावन्दनपद्धतिम् ॥

भाष्याणि वेदस्य विलोक्य निर्मिता विद्वत्प्रिया निर्णयकल्पवल्लचसौ ।
गम्भीरसंशोभिपदानुगुम्भिता लब्धागमश्रेणिबुभुत्सया मया ॥

इह खलु सकलसत्कर्मपरिगणनायामादितः परिगणनार्हस्य सन्ध्यावन्दनकलापस्य स्वरूपविशेषजिज्ञासा यथाकथञ्चिद्गुणापि श्रेयान् स्वधर्मो विगुणोऽपि यस्मादिति भगवदुपदेशात् स्वधर्मत्वेन श्रेयसीति मनसि निधाय निरन्तरशुश्रूषापरितोषितसदाचार्यमुखकमलोदीरितसिद्धान्तसारान्निर्गलितमतिरहस्यमाकलय्य यथायोगं प्रकाश्यते । तत्र तावत्सन्ध्यावन्दनं नित्यम् अहरहस्सन्ध्यामुपासीतेति श्रुतौ वीप्सावशात् । अहरहः प्रवृ(व्र)ज्यते, अर्धमासे अर्धमासे प्रवृ(व्र)ज्यते, वसन्ते वसन्ते ज्योतिषा यजेतेत्यादौ तथा दर्शनात् । ननु युक्तं तत्र नित्यत्वं यथाकालाकरणे प्रायश्चित्तस्मरणात् । आ तृतीयात्पुरुषात्सोमपानाभावे दौर्ब्राह्मण्यश्रवणाच्च ।

* * * *

एवं मार्जनं कर्तव्यमिति स्थिते तद्विनियुक्तमन्त्रार्थो विचार्यते— आपो हि ष्ठेति । हे आपः हिशब्दः एवकारार्थः, तथाच यूयमेवेत्यर्थः पर्यवसन्नः । मयोभुवः सुखसम्पादयित्र्यः स्थ भवथ । दीर्घश्छान्दसः । तासां स्नानादिहेतुत्वेन सुखोत्पादकत्वं जगत्प्रसिद्धमिति भावः ।

End:

नक्षत्रञ्च तथा सूर्यं द्विजानप्यभिवादयेत् ।
विना पुत्रं च शिष्यञ्च दौहित्रं दुहितुः पतिम् ।

इति वचोभिः सन्ध्यादेवताभिवादनस्यानुक्तत्वात् द्विजाद्यभिवादनस्यैव उक्तत्वाच्च तदभिवादनं प्रस्तुतवाक्यार्थः । सन्ध्याया अपि गरीयस्याः पुनरभिवन्दनमस्त्विति ॥

Colophon:

श्रीकृष्णं जगदेकपण्डितमणिः श्रीरामभट्टार्यकः
श्रीलक्ष्मीरपि यं जजान तनयं प्रत्यक्षबोधोज्वलम् ।
तन्न्यग्रोधसमीपवासिभगवन्मन्त्रानुचिन्ताफले
सन्ध्यावन्दननिर्णये निरगमद्ग्रन्थः चतुर्थः स्फुटम् ॥

No. 2886. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Substance, palm-leaf (Śītāla). Size, 20⅝ × 2¾ inches. Pages, 21. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 70*a*.

Complete.

By Kṛṣṇapaṇḍita.

The other works herein are :—

	Fol.		Fol.
Mukundamālāstōttram ..	1*a*	Kaṭṭumantram (Tamil)..	5*b*
Apāmārjanam	1*b*	Citivāsinībhairavīmantraḥ.	,,
Śītalāstōttram	3*a*	Dhūmāvatīmantraḥ ..	,,
Lavanapañcākṣaram ..	,,	Raktacāmuṇḍīmantraḥ ..	,,
Garuḍapañcākṣaraḥ ..	,,	Garuḍakavacastōttram ..	,,
Āśutārkṣyamantraḥ ..	3*b*	Puruṣhasūktayantram ..	6*a*
Sudarśanamantraḥ ..	,,	Jvarayantram	,,
Krōḍamukhīstōttram ..	4*a*	Gaṇēśayantrōddhāraḥ ..	,,
Gāruḍabrahmavidyā ..	,,	Sūryaśatakam	,,
Vārāhīstōttram	4*b*	Dattātrēyavajrakavacastōttram	8*b*
Daśavidhamantrasaṁskāraḥ	,,	Dattātrēyamālāmautraḥ.	9*a*
Śanaiścarastōttram ..	5*a*	Āñjanēyāṇuṣṭubhamantraḥ	,,
Āñjanēyastōttramantraḥ.	,,		
Pañcahanūmanamantraḥ.	5*b*		

	Fol.
Pañcamukhahanūmanmantraḥ	9*b*
Rāmatārakaṣaḍakṣarīmantraḥ	„
Mahālakṣmīkavacastōttram	„
Rāmāṣṭōttaraśatanāmastōttram	10*a*
Sudarśanastōttram ..	„
Śarabhamantraviṣaya .	„
Śarabhakavacaḥ.. ..	12*b*
Hanūmatkalpaḥ . ..	13*a*
Pāpaśuddhiprakāraḥ ..	14*a*
Saurāṣṭākṣarīmantraḥ ..	„
Śivakavacabrahmavidyāmantraḥ	14*b*
Mahāgaṇapatimantraḥ ..	15*a*
Pratikriyāśūlinīviśvarūpastōttram	„
Pratikriyāśūlinīsumukhīkaraṇastōttram ..	15*b*
Mārādēvīkavacavidhānam	„
Sarvaśāntistavaḥ ..	16*a*
Śūlinīprāṇayantram ..	16*b*
Atharvaṇabhadrakālīmahāvidyā	„
Pratijñāśūlinīmahāmantraḥ	„
Pañcākṣaramantraḥ ..	„
Bālāmantraḥ	17*a*
Cidambaranatēśvaramantraḥ	„
Aśvārūḍhāviṣayaḥ ..	„

	Fol.
Nṛsimhatāpanīyamantraḥ.	17*b*
Hanūmanmālāmantraḥ..	18*a*
Nṛsimhakavacaḥ.. ..	18*b*
Pañcamukhahanūmadyantram	„
Bahalāmukhīmantraḥ ..	„
Aṣṭamukhagaṇḍabhēraṇḍanṛsimhamantram ..	„
Aṣṭamukhagaṇḍabhēraṇḍanṛsimhamālāmantram.	„
Aṣṭamukhagaṇḍabhēraṇḍanṛsimhayantram ..	„
Nṛsimhamālāmantraḥ ..	20*b*
Vīrahanūmanmālāmantraḥ	21*a*
Hanūmadāpaduddhāraṇastōttramantraḥ ..	„
Santānagōpālamantraḥ ..	21*b*
Gopālāṣṭādaśākṣarīmantraḥ.	„
Nṛsimhāṣṭōttaraśatanāmastōttram	„
Nṛsimhatāpanīyam ..	„
Garuḍapañcākṣaravidhānam	22*a*
Indrākṣīmālāmantraḥ ..	24*a*
Hanūmanmālāmantraḥ ..	„
Vidāraṇanṛsimhamantraḥ.	„
Sūryasahasranāmastōttram	25*a*
Vāyavyāstramantraḥ ..	27*a*
Sandhyāvandanamantraḥ.	27*b*
Mātṛkāsarasvatīmantraḥ.	28*a*
Mahāpañcakanyāsaḥ ..	28*b*
Gāyatrīhṛdayam.. ..	29*a*

	Fol.
Gāyatrīstavarājaḥ ..	30*a*
Sāvitrīpañjaram	31*a*
Gāyatrīmālāmantraḥ ..	32*a*
Arghyamantraḥ	„
Sandhyāvandanamantraḥ.	„
Gāyatrīmālāmantraḥ ..	32*b*
Mṛtyulāṅgūlamantraḥ ..	33*a*
Gāyatryakṣaranyāsaḥ ..	„
Gāyatrībhujaṅgastōttram.	„
Gāyatryaṣṭōttaraśatanāmastōttram	33*b*
Gāyatrīsahasranāmastōttram	„
Gāyatryaṣṭasahasram ..	35*b*
Arapaṭam	37*a*
Mantrōpadēśakālanirṇayaḥ	„
Ākāśabhairavakalpa ..	38*a*
Tvaritāmantraḥ	45*b*
Vīrabhadramantraḥ ..	„
Baḍabānalamantraḥ ..	„
Mahāmāyāmantraḥ ..	„
Brāhmīmantraḥ	„
Vanadurgāmahāvidyāmantraḥ	„
Śāstāmantraḥ	48*b*
Dakṣiṇakālikavacastōttram.	„
Dakṣiṇakālibhujaṅgastōttram	49*a*

	Fol.
Kālikāstōttram	49*b*
Kālikārādhanaviṣayaḥ ..	50*a*
Ādityakavacastōttram ..	„
Pañcaratnastōttram ..	50*b*
Bhavānīkavacastōttram..	„
Bhuvanēśvarīkavacastōttram	„
Navagrahakavacam ..	51*a*
Vidyāgaṇēśāṣṭōttaraśatanāmastōttram.. ..	51*b*
Saundaryalaharī ..	„
Rājarājēśvarīstavaḥ ..	53*b*
Trailōkyamōhanakavacaḥ.	54*b*
Sauḥāgyakavacaḥ ..	55*a*
Rājarājēśvarīkavacastōttram	55*b*
Tripurāpūjā	56*b*
Kalyāṇastavaḥ	60*b*
Rājarājēśvarīvarṇamālikāstōttram	„
Mātṛkānyāsaḥ	61*a*
Tripurasundarīmālāmantraḥ	61*b*
Parāprasādamantraḥ ..	„
Prāsādaparāmantraḥ ..	62*a*
Tripurasundarīṣōḍaśikāstavaḥ	„
Tripurasundarīmānasikapūjā	62*b*
Śūlinīdurgākalpaḥ ..	63*a*
Prapañcasārasaṅgrahaḥ..	81

No. 2887. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVAN' ANAMANTRABHĀṢYAM.

Pages, 92. Lines, 21 on a page.

Begins on fol. 44*a* of the MS. described under No. 1189.

By Kṛṣṇapaṇḍita.

Complete.

No. 2888. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Substance, palm-leaf. Size, 16¼ × 1⅝ inches. Pages, 98. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 97*a*. The other works herein are—Ghaṭasphoṭa-vidhi 1*a*, Ṣaṭkarmacandrikā 3*a*, Rajasvalāsnānavidhi 96*a*.

Complete

Copying is said to have been completed by Purāṇam Śēṣu on Thursday the 2nd of Śrāvaṇa Bahula in the year Durmukhi.

By Kṛṣṇapaṇḍita

No. 2889. सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Pages, 70. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 211.

Complete.

By Kṛṣṇapaṇḍita.

No. 2890. सन्ध्यावन्दनविधिः.

SANDHYĀVANDANAVIDHIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 3*a* of the MSS. described under No. 2510.

Beginning:

द्विराचम्य प्राणानायम्य भगवदाज्ञया भगवत्प्रीत्यर्थं प्रातस्सन्ध्यामुपासिष्ये इति सङ्कल्प्य कृतश्चेत्यादिसात्त्विकत्यागं कृत्वा भगवन्तं श्रीभूमिनीळासमेतं ध्यात्वा पूर्व(र्वं)पुण्ड्रोधारणे उदकोर्ध्वपुण्ड्रं द(धृ)त्वा आपो हिष्ठे ति मन्त्रस्य सिन्धुद्वीप ऋषिः, देवी गायत्रीच्छन्दः, आपो देवता । इति शिरोजिह्वाहृदयेषु सर्वत्र ऋषिच्छन्दोदेवताः न्यस्येत् इत्युक्तरीत्या अनङ्गुष्ठाभिः अङ्गुलीभिः न्यस्य प्रोक्षणे विनियोगः इत्युक्त्वा वामहस्तेन तोयं संस्पृश्य देवतीर्थेन ऊर्ध्वमुखेन शिरसि प्रणवेन एकवारं समस्तव्याहृतिभिः, एकवारं गायत्र्या च, एकवारं प्रणवादिभिः, आपो हि ष्ठेत्यादिभिः सप्तभिः प्रत्येकञ्च सम्प्रोक्ष्य ।

End:

सप्रदक्षिणं सन्ध्यायै नमः, सावित्र्यै नमः, इत्यादिना प्रणम्य (णम्य) कामोऽकार्षीन्मन्युरकार्षीदिति चोक्त्वा त्रयीतनुं प्रणम्य अभिवाद्य दिगादिनमस्कारमपि कृत्वा "स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः" इत्यधीतं हृदयान्तस्थितं भगवन्तमभिवादयेत् । जपादिमध्ये वाङ्नियमातिक्रमे इदं विष्णुरिति ऋचं जपेत् । विष्णु(ष्णुं)वा संस्मरेत् । श्रीकृ णं वा ध्य(ा)त्वा कीर्तयेत् । जपमध्ये शूद्रान्त्यपतितश्वादिदर्शने आचम्य पुनर्जपेत् । सम्भाषणे स्नात्वा पुनर्जपेत् ॥

No. 2891. सन्ध्योपस्थानमन्त्राः.

SANDHYŌPASTHĀNAMANTRAH.

Substance, palm-leaf. Size, $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, good Appearance, new.

Begins on fol 79*a*. The other work herein is, **Adhikaraṇa-sārāvali** 1*a*.

Contains the hymns repeated as Upasthāna in the morning, midday and evening prayers.

No. 2892. समिदाधानम्.

SAMIDĀDHĀNAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{5}$ inches. Pages, 6. Lines, 4 on a page. Character, Telugu Condition, good Appearance, old.

Begins on fol. 243*a*. The other works herein are—Pūrvāpara-prayōga 1*a*, Śrīsūkta 206*a*, Samāvartanakālaprāyaścitta 209*a*, Upanayanasaṅkalpa 210*b*, Śayanavidhi 215*a*, Garbhādhānavidhi 215*b*, Nāgabali 230*a*, Brahmacārivratalōpaprāyaścitta 234*a*, Āśīrvāda 241*a*, Upākarma 246*a*, Adhyāyōtsarjanavidhi 253*a*.

Treats of the daily Hōma to be performed by Brahmacāris or Bachelors.

Incomplete.

Beginning:

एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्रातरग्निकार्यं करिष्ये । परि त्वाग्ने परिमृजाम्यायुषा च धनेन च सुप्रजाः प्रजया भूयासं सवि-(सुवी)रो वीरैः सुवर्चा वर्चसा सुपोषः पोषैः सुगृहो गृहैस्सुपतिः पत्या सुमेधा मेधया सुवह्मा ब्रह्मचारिभिः.

End:

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्च-स्वी भूयासं यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम् . . . . . .

आयुष्मान् भूयासम्, अन्नादो बू(भू)यासम्, यशस्वी भूयासम्, सर्व-समर्दो(र्धो) भूयासम् । पुनस्त्वादित्या.

* * * *

स्वस्ति श्रधां(द्धां) मे.

No. 2893. सन्ध्यावन्दनविधिः.

SANDHYĀVANDANAVIDHIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 2840.

Complete.

Beginning:

त्रैवार्णिकानां सर्वेषां चतुराश्रमवासिनाम् ।
यत्सन्ध्यावन्दनं सर्वं भगवान् शौनकोऽब्रवीत् ॥

तत्र ग्रामान्तिकं प्राप्य ब्रह्मसूत्रधरो भवेत् ।
ऋग्भिस्तिसृभिरापो हि ष्ठादिभिः प्रोक्षणं जलैः ॥

नवप्रणवसंयुक्तं क्षिपेद्वारि पदे पदे ।
विप्रुषोऽष्टौ क्षिपेदूर्ध्वमधो यस्य क्षयाय च ॥

End:

उदु त्यमिति सूक्तेन उपस्थानं(य) च भास्करम् ।
एवं त्वहरहः कृत्वा सर्वपापैः प्रमुच्यते ॥

Colophon:

इति बृहच्छौनकीये सन्ध्यावन्दनविधिः ॥

III. DIGESTS—(SPECIAL).

(2) ĀCĀRA.

The works mentioned in this sub-division relate to the general rules of conduct in regard to the various important religious ceremonies.

No. 2894. अग्निसन्धानवचनम्.

AGNISANDHÁNAVACANAM.

Page, 1. Lines, 6 on a page.

Begins on fol 55*b* of the MS. described under No. 2824.

This relates to the ceremony performed to make up for omissions in the daily performance of Aupāsana.

Beginning :

विच्छिन्नवह्निराधाय कर्माङ्गं विधिवद्द्विजः ।
सायमारभ्य जुहुयात् आहुतीनां चतुष्टयम् ॥
यदा सन्दी(न्धी)यते वा(ग्निः) प्रायश्चित्तं(त्त) पुरस्सरम् ।
तदा सायं विजानीयात् प्रातर्होमं ततः परम् ॥

End :

वह्निस्तरणमध्ये तु यदि स्यादाज्यशोधनम् ।
स मूढो नरकं याति सा क्रिय(ा)निष्प(ष्फ)ला भवेत् ॥

No. 2895. अग्निसंसर्गविधिः.

AGNISAṀSARGAVIDHIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 5*a* of the MSS. described under No. 2840.

Complete.

Beginning:

अथाग्ने(ग्न्योः) गृह्ययोर्योगः(गे) सपत्नीभेदजातयोः ।
सहाधिकारान् पत्नीभिः अहं वक्ष्यामि शौनकः ॥
पृथक् स्थण्डिलयोरग्निं(ग्निं) समाधाय यथाविधि ।
तन्त्रं कृत्वाज्यभागान्तमिध्माधानादिकं ततः ॥
जुहुयात् पूर्वपत्न्यग्नौ तयान्वारब्ध आहुतीः ।
अग्निमीले पुरोहितेति सूक्तेन नवके(न) तु ॥

End:

पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः ।
अ(ा)दधीतान्यया सार्धमाधानविधिना गृही ॥

Colophon:

इति बृहच्छौनकीये अग्निद्वयसंसर्गविधिः ॥

No. 2896. अङ्कुरार्पणविधिः.

AṄKURĀRPAṆAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 81*b* of the MS. described under No. 2840.

Treats of the rites in connection with the sowing of different kinds of corn to grow during important religious festivals, for augury.

Complete.

अथाङ्कुरार्पणं वक्ष्ये शौनकोऽहं द्विजन्मनाम् ।
देवोत्सवे तु संप्राप्ते तत्पूर्वं नवमेऽहनि ॥
पञ्चमेऽह्नि मनुष्याणां तृतीये तद्दिनेऽपि वा ।
अङ्कुरश्चान्यमासे तु सौरे चान्द्रे विनाशकृत् ॥
दिवाकार्ये दिवा का(कु)र्यात् निशाकार्ये निशा भवेत् ।
प्रदोषो(षे)वाथ सायाह्ने गुणाधिक्येऽह्नि केऽपि वा ॥

End:

एवं कृत्वा तु मतिमान् चूडादिशुभकर्मसु ।
अस(भ्य)र्च्चे पालिकाः कूपे कर्मान्ते विसृजेत्ततः ॥
हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेऽपि च ॥

Colophon:

इति बृहच्छौनकीये अङ्कुरार्पणकर्मविधिः ॥

No. 2897. अध्यायोत्सर्जनविधिः.

ĀDHYĀYŌTSARJANAVIDHIḤ.

Pages, 11. Lines, 5 on a page.

Gives the rules for temporarily suspending the study of the Vēdas.

Begins on fol. 253*b* of the MS. described under No. 2892.

Complete.

अथोत्सर्जनविधिरुच्यते ।

अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते ।
ग्रामाद्बहिर्विविक्ते स्यात् धूपदीपादि पूर्ववत् ॥

उत्सर्जनं माघ्यां पौर्णमास्यां कुर्वीत । यद्वा उपाकर्मदिवसे वा कुर्यात् । गृहसिद्धानां होमद्रव्याणा(ण्या)दाय ग्रामाद्बहिर्विविक्तदेशं गत्वा गुरुशिष्यैः समन्वारब्धो भूत्वा स्वस्तिवाचनं कृत्वा प्राणानायम्य देशकालौ संकीर्त्य एवंविशिष्टे शुभे मुहूर्ते अधिका(अध्याया)नामुत्सर्जनाख्यं कर्म करिष्य इति सङ्कल्प्य.

End:

शुक्ले वेदमधीयीत कृष्णा(ष्णे ऽ)ङ्गानि पठेत्ततः ।
कर्मद्वये लौकिकाग्निं किं(के)चिदिच्छन्ति . . . ॥

अत्राश्वलायनः—

अत आरभ्य षण्मासाद्वेदाङ्गानि त्वधीयते ।
शुक्ले वेदमधीयीत शुक्ले(कृष्णे)ऽङ्गानि . . . ।
कर्मद्वयमिदं केचित् लौकिकाग्नौ प्रकुर्वते ॥

Colophon :

इत्युत्सर्जनविधिः ॥

No. 2898. अर्कविवाहः.

ARKAVIVĀHAḤ.

Substance, palm-leaf. Size, 13 × 1½ inches. Pages, 2. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

This treats of the marriage with the Arka plant.

This kind of marriage is enjoined to be performed before a man marries a third wife who thereby becomes the fourth.

Complete. By Śaunaka.

Begins on fol. 115*a*. The other works herein are :—

	Fol.
Sarvāriṣṭaśāntiḥ	1*a*
do.	2*a*
do. (Prayōga)..	3*a*
Kuhūśāntiḥ	9*a*
Bhānuvārajanmanakṣatra-yōgaśāntiḥ	14*b*
Bhaumavārajanmanakṣa-trayōgaśāntiḥ	15*b*
Mandavārajanmarkṣaśāntiḥ	16*b*
Saṅkrāntijananaśāntiḥ ..	17*b*
Sūryōparāgaśāntiḥ ..	18*b*
Sōmōparāgaśāntiḥ ..	20*b*
Grahaṇadōṣavāraṇaślōkaḥ	23*a*
Vidyutpatanaśāntiḥ ..	23*b*
Vāyasapravēśaśāntiḥ.	24*a*
Vāyasasamyōgadarśana-śāntiḥ	27*a*
Vāyasasparśaśāntiḥ ..	28*a*
Vāyasapādatuṇḍasparśana-śāntiḥ	28*b*
Kākaviṣṭhāsparśanaśāntiḥ	29*a*
Rōmakhaṇḍanaśāntiḥ ..	30*a*
Dussvapnaśāntiḥ	30*b*
Śūdraśāntiḥ	31*a*
Gṛdhrōlūkakapōtaśāntiḥ	31*b*
Apamṛtyuñjayaśāntiḥ ..	32*a*
Śiśurakṣā	32*b*
Cikitsāsādhyanānārōgarudra-śāntiḥ	34*a*
Sarvarōgaśāntiḥ	35*b*

	Fol.
Jvaratarpaṇam	36*b*
Jvaragāyatrī	*ibid.*
Jvaraharastōtram ..	37*a*
Pallisaraṭapatanaśāntiḥ ..	37*b*
Śītajvaraharaviṣṇupūjā ..	39*a*
Tāpajvarahararudrabaliḥ	40*a*
Ulūkaśāntiḥ	40*b*
Śithilīśāntiḥ	42*b*
do. Prayōgaḥ ..	44*a*
Tripuṣkaraśāntiḥ	48*a*
Tripuskarayōgaśāntiḥ ..	49*b*
Dhanvantariśāntiḥ ..	50*b*
Kāruparva	52*a*
Vāstuśāntiḥ	55*a*
Madhumakṣikāśāntiḥ ..	62*b*
Kāṭōlūkapātaśāntiḥ ..	63*b*
Dūrvāhōmaḥ	64*b*
Kadalīśāntiḥ	65*b*
Valmīkaśāntiḥ	66*a*
Yaksmaśāntiḥ	67*a*
Kuhūśāntiḥ	
Adbhutōtpātaśāntiḥ ..	71*b*
Utpātaśāntiḥ	76*b*
Gavādigṛhārōhaṇaśāntiḥ ..	79*a*
Vṛkṣādivaikṛtiśāntiḥ ..	80*a*
Divānakṣatradarśanaśāntiḥ	82*b*
Divājātāśvaśāntiḥ (Aśva-śāntiḥ)	84*b*
Aśvaśāntiḥ	86*a*
Jīvantībandhanam ..	87*a*
Āyuṣyahōmaḥ	92*a*
Tithirōgabaliḥ	93*a*
Vārabaliḥ	94*b*
Nakṣatrabaliḥ	95*b*
Aṁśabaliḥ	98*b*

	Fol.
Rōganakśatraśāntiḥ ..	99*a*
Rōgaśāntiḥ	100*b*
Nakṣatrahōmaprayōgaḥ	102*a*
Rōganakṣatraśāntiḥ ..	102*b*
Śītajvaraharabaliḥ ..	105*a*
Ārōgyabaliḥ	106*a*
Caturviṁśatimūrtilakṣaṇam	107*a*
Utpalaśāntiḥ	107*a*
Dṛgdōṣaśāntiḥ	107*b*
Alakṣmīśāntiḥ	109*a*
Śatruśāntiḥ	110*b*
Kṛtyaśāntiḥ	111*a*
Kēśadahanaśāntiḥ ..	111*a*
Narapatanaśāntiḥ ..	111*b*
Udakaśāntiprayōgaḥ ..	112*b*
Dūrvāhōmaprayōgaḥ ..	113*a*
Mṛtyuñjayakalpadūrvāhōmaprayōgaḥ	113*b*
Putrakāmēṣṭiḥ	114*a*
Ārōgyasnānaprayōgaḥ ..	114*b*
Arkavivāhaḥ	115*a*
Durmaraṇaprāyścittam .	115*b*
Rōganāśahōmaprayōgaḥ	117*a*
Yatisaṁskāravidhiḥ ..	117*b*
Tilāyutahōmaḥ	118*b*
Hōmakuṇḍādividhānam	118*b*
Mṛtyunjayāyutahōmaḥ	120*a*
Vardhāpanahōmaḥ ..	121*a*
Sarvagrahayōgaśāntiḥ ..	122*b*
Yēkōdaramukhanirīkṣaṇavidhiḥ	123*a*
Śaniśāntiḥ	124*a*
Dēvatāpratiṣṭhā	126*a*
Dānamantrāḥ	128*b*

	Fol.		Fol.
Ugrarathaśāntiḥ ..	135*b*	Ugrarathaśāntiḥ ..	138*a*
Aśanihataśāntiḥ ..	136*a*	Śaniśāntiḥ	140*a*

Beginning :

तृतीये यस्य संप्राप्ते विवाहे पुरुषस्य तु ।
अर्के विवाहं वक्ष्यामि शौनकोऽहं विधानतः ॥
अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ।
नान्दीश्राद्धं प्रकुर्वीत स्थण्डिलं तूपवेशयेत् ॥

End :

स्विष्टकृदादिहोमशेषं समापयेत् । वस्त्रालङ्काराहिरण्यादि ब्राह्मणेभ्यो दद्यात् ॥

Colophon :

इति शौनकीये अर्कविवाहविधिः ॥

No. **2899.** अर्कविवाहः.

ARKAVIVĀHAḤ.

Pages, 2. **Lines,** 7 on a page.

Begins on fol. 22*b* of the MS. described under **No.** 2840.

Also by Śaunaka.

शौनकोऽहं प्रवक्ष्यामि अर्कोद्वाहविधिं प्रति ।
अर्कोद्वाहं विना चैव तृतीयां नोद्वहेद् द्विजः ॥
विवाहोक्तदिने कुर्यात् कन्यावरणवर्जितम् ।
वस्त्राभरणमाल्यादि अर्कमूले विनिक्षिपेत् ॥

End :

तिलोदकं त्रिवारं स्यात् गोत्रनामतिलैस्सह ।
ब्राह्मणान् भोजयेत् पश्चात् गां दद्यात् स्वस्तिवाचनम् ॥

Colophon :

इति शौनकीये अर्कविवाहविधिः ॥

No. 2900. अर्कविवाहः.

ARKAVIVĀHAḤ

Pages, 3. Lines, 10 on a page.

Is contained in Āpastambapūrvaparayōgaḥ which begins on fol. 18*a* of the MS. described under No. 1058.

Incomplete.

Beginning :

अतः परं प्रवक्ष्यामि अर्कोद्वाहविधिं प्रति ॥
अर्कोद्वाह(हं) विधायैव तृतीयामुद्वहेद्बुधः ॥
विवाहोक्तविधिं कुर्यात् गृह्योक्तविधिना ततः ।
नान्दीमुखाङ्कुरं चैव रक्षाबन्धं विवर्जयेत् ॥
अर्कालयं ततो गत्वा शुचौ देशे समाहितः ।
गोमयेनोपलिप्याथ स्वस्तिवाचनपूर्वकम् ॥

End :

स्वशाखोक्तविधानेन होममन्त्रेण कारयेत् ।
गायत्र्या वापि कुर्वीत केचिदेवं वदन्ति हि ॥

No. 2901. आचारवचनानि.

ĀCĀRAVACANĀNI.

Pages, 18. Lines, 8 on a page.

Begins on fol. 92*a* of the MS. described under No. 2824.

Incomplete.

Beginning :

आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नामान्ते वाच्यः पूर्वाक्षरः प्लुतः ॥
कृताभिवादनं विप्रो यः पुनर्नाभिवादयेत् ।
श्मशाने जायते वृक्षः काककङ्कोपसेवनम्(वितः) ॥

End:

चतुर्थी(र्थीं)नवमीं चैव दर्शंचैव चतुर्दशी(म्) ।
यत्नेन वर्जयेच्छिष्टा(ष्टो) मध्यमा(मां) वस्त्रधारणे ॥

No. 2902. आतुरसन्न्यासविधिः.

ĀTURASANNYĀSAVIDHIH.

Substance, palm-leaf. Size, 12⅔ × 1½ inches. Pages, 2. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 4*a*.

This treats of the rites connected with the conversion of one who has lived a secular life, to the order of Sannyāsis or ascetics just before ones death.

Complete.

The other works herein are :—

	Fol.		Fol.
Pārthivēśvaracintāmaṇi-pūjāvidhiḥ ..	1*a*	Īśvarapūjāvidhānam ..	27*a*
Āślēṣāśantividhiḥ ..	2*b*	Śanivāravratam ..	31*a*
Yatisaṁskāraḥ ..	5*a*	Jyautiṣaviṣayaḥ ..	37*b*
Pārvaṇaśrāddham ..	6*b*	Sarvaśāntikhaṇḍaḥ ..	41*a*
Nṛsiṁhakavacam ..	8*a*	Sarvaprāyaścittam ..	43*b*
Śanipradōṣapūjāvidhiḥ ..	10*a*	Kuṇḍalakṣaṇam ..	46*a*
Śivakavacam	13*b*	Gāyatrīyantraṁ ..	54*a*
Itihāsaḥ	17*a*	Kārtavīryayantrōddāraḥ..	55*a*
Prāṇāgnihōtram ..	22*a*	Sahagamanaśrāddham ..	57*a*
Sōmōtpattiḥ	23*a*	Pitṛmēdhaḥ	60*a*
Jātavēdasannyāsaḥ ..	24*b*	Bahirmātṛkāmantraḥ ..	89*a*
Vibhūtidhāraṇamantraḥ..	25*a*	Pañcīkaraṇam ..	90*a*
		Vyāsapūjā	91*a*

Beginning :

आङ्गी(ङ्गि)रसः—

आतुराणां विशेषोऽस्ति न विधिर्नैव च क्रिया ।
प्रैषमात्रेण सन्न्यास आतुराणां विधीयते ॥

आसन्ने सङ्कटे घोरे चोरव्याघ्रादिपीडने ।
आतुरस्य तु सन्न्यासः कर्तव्यो मनुरब्रवीत् ॥
आदौ च सशिखं वाथ केशानां सप्तकं न्यसेत् ।
व्यवधानं भवेत्किञ्चित्प्रायश्चित्तं समाचरेत् ॥
गत्वोदकसमीपं तु पात्रयोरप उद्धरेत् ।
द्वयोरेकं करेणाथ गृहीत्वा दक्षिणेन वै ॥

End :

अनन्तरं ब्रह्म ब्रह्मैवेदममृतं पुरस्तात् ।
एवमुक्त्वा त्यजेद्वस्त्रमथ गच्छेदुदङ्मुखः ।
ततः शिष्यैः समानीतं काषायं धारयेद्यतिः ॥

Colophon :

इत्यातुरसन्न्यासविधिः ॥

No. **2903.** आतुरसन्न्यासविधिः.

ĀTURASANNYĀSAVIDHIḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 145*b* of the MS. described under **No. 673.**

Beginning :

अथाङ्गिरसप्रोक्तमातुरसन्न्यासविधिं व्याख्यास्यामः ।

अरण्ये संकटे घोरे चोरव्याघ्रादिगोचरे ।
भयं प्राप्तस्य सन्न्यासं कर्तव्यं मनुरब्रवीत् ॥
आतुराणाञ्च सन्न्यासे न विधिर्नैव च क्रिया ।
प्रेषमात्रं समुच्चार्य सन्न्यासं तत्र पूरयेत् ॥
संन्यस्तमिति यो ब्रूयात् प्राणैः कण्ठगतैरपि ।
स भित्वा मण्डलं भानोः परं ब्रह्माधिगच्छति ॥

End :

शतभिर्जन्मभिर्वेदो वेदार्थश्शतजन्मभिः ।
सहस्रजन्मभिस्साम सन्न्यासः कोटिजन्मसु(भिः) ॥

Colophon :

इत्यनाहिताग्नेरातुर(सन्न्यास) विधिस्समाप्तः ॥

No. 2904. आतुरसन्न्यासविधिः.
ĀTURASANNYĀSAVIDHIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 16*b* of the MSS. described under No. 2749.

Beginning :

काश्यपः आपस्तम्बस्मृतौ—

आपत्काले तु संप्राप्ते सन्न्यासं कर्तुमिच्छति ।
समीपन्तु गुरोर्गत्वा प्रैषग्रहणमाचरेत् ॥

प्रैषमात्रं गुरोर्लब्ध्वा सन्न्यसेदापदि द्विजः ।
क्रमसन्न्यासकं कुर्यादनापदि विधानतः ॥ इति ॥

वसिष्ठस्मृतौ—

अनापदि त्वापदि वा सन्न्यस्यति गुरुं विना ।
स मृतो याति यत्यत्वं(र्हं) प्रायश्चित्तं समाचरेत् ॥

End :

शाण्डिल्यः—

प्रैषमन्त्रं गुरोर्लब्ध्वा सन्न्यसेदातुरो द्विजः ।
उपदेशं विना यस्तु सन्न्यसेन्मोहितो यदि ॥

स पापात्मा महाघोरे चिरं तिष्ठति रौरके(वे) ॥

No. 2905. आत्माग्निहोत्रविधिः.

ĀTMĀGNIHŌTRAVIDHIḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 23*a* of the MS. described under No. 2118. Incomplete.

Beginning:

कात्यायनऋषिप्रोक्तम् अथात आत्माग्निहोत्रविधिं व्याख्यास्यामः—

वामहस्तस्पृशं पात्रं दक्षिणे आज्यच संस्थितम् ।
सनातमुच्यते तत्र अच्छिन्नाग्रेण पूरयेत् ॥
पूरं पूरकपूर्णार्थं निश्चलं कुम्भको भवेत् ।
विनिश्वस्य स्व(श)नैर्वायुः रेचकं तं विनिर्दिशेत् ॥
प्राणापाने तथा व्याने उदाने शुचये तथा ।
समाने च तथा प्रोक्तं शारीरस्थितिकारकाः ॥

End:

उच्छिष्टोच्छिष्टसंस्पृष्ट्या शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥
अनुच्छिष्टं तु संस्पृष्ट्वा सचेलस्नानमाचरेत् ।
द्विजः स्पृष्ट्वाहुतिं प्राप्य यज्ञकर्मफलं विना ॥

एष कात्यायनविधिः.

No. 2906. आश्रमधर्मसारः.

ĀŚRAMADHARMASĀRAḤ.

Substance, paper. Size, $6\frac{3}{4} \times 4\frac{1}{4}$ inches. Pages, 9. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Begins on fol. 1*a*. The other work herein is, Śiśupālavadha 11*a*.

Beginning:

तिथिच्छेदो न कर्तव्यः विनाशौचं यदृच्छया ।
पिण्डश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत् ॥

चकारेणाग्नौ करणं समुच्चिनोति । श्राद्धशब्देनात्र ब्राह्मणतर्पणं विवक्षितम् । पिण्डदानस्य पृथगुपात्तत्वात् । विच्छित्तिं नैव कारयेदिति । ब्राह्मणतर्पणं कर्तुमसमर्थश्चेत्पिण्डदानमात्रमपि कुर्यात्; सर्वथा पित्रर्चनस्य विच्छित्तिं विच्छेदं न कुर्यादित्यर्थः ॥

End:

पितृमासचतुष्केषु गृहस्थानां द्विजन्मनाम् ।
केशखण्डं प्रकुर्वीत पितॄन् प्राशयते यमः ॥
धनुःकुम्भे त्रिभागे स्यात्पूर्वभागं परित्यजेत् ।
भागद्वयं कर्कटके सर्वौ कन्यां विवर्जयेत् ॥
या चैत्रवैशाखसित(ि)तृतीया
माघस्य सप्तम्यपि फाल्गुनस्य ।
तत्कृष्णपञ्चम्यपि चोपनीतौ
प्रोक्ता भरद्वाजमुनेः प्रशस्ता ॥

No. 2907. गृहदेवतासंप्रोक्षणविधिः.

GṚHADĒVATĀSAMPRŌKṢAṆAVIDHIḤ.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 4. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Rules regarding the consecration of the house hold deity.

Begins on fol. 1*a*.

The other works herein are—

	Fol.		Fol
Lakṣasvastika ..	.. 3*a*	Lakṣanamaskāra ..	.. 7*b*
Lakṣadīpakalpa ..	.. 5*b*	Varalakṣmīvrata ..	.. 9*a*

	Fol.		Fol.
Vināyakavrata	14*a*	Śivarātrivrata	66*a*
Dūrvāvināyakavrata ..	20*a*	Gōpadmavrata	70*a*
Daśāphalavrata	23*a*	Binducilukudvādaśī ..	73*a*
Gōpadmavrata	25*a*	Lakṣavartivrata ..	76*a*
Garuḍastōtra (Bṛhaspati)	27*a*	Sūryācandramōvrata ..	82*a*
Yamunāpūjā	28*a*	Dānaphalavrata ..	90*a*
Anantavratakalpa ..	30*a*	Svarṇagaurīvrata ..	96*a*
Ṛṣipañcamīvrata.. ..	38*b*	Umāmahēśvaravrata ..	99*a*
Nṛsiṁhajayantīkalpa ..	43*a*	Sōmavāravratōdyāpana ..	105*a*
Vāmanajayantīkalpa ..	47*a*	Daśāphalavrata	111*a*
Śītalāstava	57*a*	Subhāṣitaratnāvalī ..	113*a*
Kēdāravrata	58*a*		

Beginning:

सम्प्रोक्षणविधिं वक्ष्ये गृहार्चनविधौ हरेः ।
येन सम्प्रोक्षिते बिम्बे सन्निधत्ते सदा हरिः ॥

पूर्वं स्थापितबिम्बस्य न पुनस्स्थापनं स्मृतम् ।
स्थापने तु महान् दोषः तस्य सम्प्रोक्षणं स्मृतम् ॥

अङ्गभङ्गादिसन्धाने प्रतिष्ठां पुनराचरेत् ।
जलाधिवासरहितं नेत्रोन्मीलनवर्जितम् ॥

End:

पुरुषसूक्तेन विधिना जुहुयात्षोडशाहुतीः ।
मूर्तिमन्त्रेण सकृद्धुत्वाग्निं परिमार्जयेत् ॥

वस्त्रादिभिश्च देवाग्रे विधिना गुरुमर्चयेत् ।
ब्राह्मणान् भोजयेत्पश्चाद्यथापूर्वं समर्चयेत् ॥

Colophon:

इति शौनकीये संप्रोक्षणविधिः ॥

No. 2908. गृहदेवतासम्प्रोक्षणविधिः.

GṚHADĒVATĀSAMPRŌKṢAṆAVIDHIḤ.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 107*a*.

The other works herein are :—

	Fol.		Fol.
Dānaphalavratakalpaḥ ..	1*a*	Vināyakavratakalpaḥ	55*a*, 87*a*
Yamunāpūjā	15*a*	Daśāphalavratakalpaḥ	62*a*, 79*a*
Gōpadmavrata	17*b*	Ṛṣipañcamīvratakalpaḥ ..	92*b*
Vanabhōjanavidhiḥ, Dhātrīhōmaḥ ..	19*b*	Yamunāpūjā	99*a*
Vāmanajayantīkalpaḥ ..	22*a*	Arkavivāhaḥ (Prayōga) ..	105*a*
Anantavratakalpaḥ ..	36*a*		
Varalakṣmīvratakalpaḥ	48*a*, 71*a*		

Beginning : same as the above.

End :

देवाग्रे गुरुमभ्यर्च्य वैष्णवान् परितोषयेत् ।
हरिमभ्यर्च्य सद्भक्त्या यथापूर्वं समाचरेत् ॥

Colophon :

इति पाञ्चरात्रविधाने गृहदेवता[पुन]पुनस्संप्रोक्षणविधिस्समाप्तः ॥

No. 2909. गृहार्चाप्रतिष्ठाविधिः.

GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 140.

A work on the same subject as the above.

Complete.

Beginning:

गृहार्चनविधौ विष्णोः प्रतिष्ठाप्य समर्चयेत् ।
भोगकैवल्यसिद्ध्यर्थं स्वकुलोद्धारणाय च ॥

अप्रतिष्ठितबिम्बस्य पूजनं सिद्धिहानिकृत् ।
बिम्बं मन्त्रमयं कृत्वा तस्मिन् देवं समर्चयेत् ॥

उत्तरायणकाले तु शुक्लपक्षे विधीयते ।
स्थापनं देवदेवस्य स्वगृहालययोरपि ॥

End:

आचार्यमर्चयेत्पश्चाद्वस्त्रालङ्कारगोधनैः ॥
नित्यार्चनं ततः कुर्यात् यावज्जीवमतन्द्रितः ॥

Colophon:

इति श्रीपाञ्चरात्रे महोपनिषदि वराहसंहितायां गृहार्चाप्रतिष्ठाविधिस्समाप्तः ॥

No. 2910. गृहार्चासम्प्रोक्षणविधिः.

GṚHĀRCĀSAMPROKṢAṆAVIDHIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 20*b* of the MS. described under No. 140.

Complete.

Beginning:

स्नने चाग्निदाहे च चिरलुप्ते च पूजने ।
चण्डालसूतिकोदक्यापतितैस्स्पृश्यते यदि ॥

विण्मूत्रश्लेष्मसंस्पर्शे संप्रोक्ष्यैव समाचरेत् ।
अन्यथा निष्फला पूजा महान् दोषश्च जायते ॥

End:

पूर्वस्थानमलङ्कृत्य देवं तत्र निवेशयेत् ॥
अर्चयेत्तं यथापूर्वं भोगकैवल्यसिद्धये ॥

Colophon:

इति भागवतसंहितायां गृहार्चासंप्रोक्षणविधिस्समाप्तः ॥

No. 2911. गोत्रप्रवरकारिका.

GŌTRAPRAVARAKĀRIKĀ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 62*a* of the MS. described under No. 211.

This gives the names of the several collections of Ṛṣis from whom the different Gōtras have sprung up.

Complete.

जामदग्निर्वीतहव्यो वैन्यो गृत्समदाह्वयः ।
वार्ध्रियश्वो गौतमाख्यो भारद्वाजाह्वयः कपिः ॥
हरितो मौद्गलः कण्वो विरूपो विष्णुवृद्धकः ।
अत्रिर्विश्वामित्रनामा वसिष्ठः कश्यपाह्वयः ॥
अगस्त्यश्चेति मुनयो ह्यष्टादश गणाः स्मृताः ।

End:

जामदग्निर्वत्सगोत्रादाप्णि(र्ष्टि)षेणस्त्वनो(नू)पगः ॥
भार्गवच्यवनावौं च (नौर्वाश्च) पञ्चावत्तीत्युदाहृताः ।
एतेभ्योऽन्ये द्विजास्सर्वे ज्ञेयाश्चतुरवत्तिनः ॥

No. 2912. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 8. **Lines, 6 on a page.** Character, Nandināgarī. Condition, good. **Appearance, old.**

A work on the same subject as the above,

This is taken from the Āpastambasūtra.

Begins on fol. 49*a*. The other works herein are: Gōtrapravaranirṇayaḥ 1*a*. 52*a*, 55*b*, Gōtrapravaranirṇayavyākhyā 7*a*, Pravaramañjarī 38*a*, Gōtrāmṛtam 59*a*.

Complete.

Beginning:

प्रवरखण्डः । प्रवरान्व्याख्यास्यामः ।

आर्षेयं वृणीते बन्धोरेव नैत्ययो(थो) सन्तत्या इति विज्ञायते; न देवैर्न मनुष्यैरार्षेयं(वृणीते, ऋषिभिरेवार्षेयं) वृणीत इति विज्ञायते; आर्षेयमन्वाचष्ट ऋषिणा हि देवाः पुरुषमनुबुध्यन्त इति विज्ञायते । यो वान्यः सन्नया(था)न्यस्यार्षेयं(येण प्र)वृणीते ।

End:

अथ शण्डिलानां त्र्यार्षेयः । अथ विश्वामित्राणां देवरातः । अथाजामीढाः कण्वाः कुक्का(क्रा)भिवैश्योर्जायनानाम् । अथ वीतहव्या यास्काः । प्रवरान्व्याख्यास्यामः । प्रवरान् प्रजा इति हि ब्राह्मणमिति हि ब्राह्मणम् ॥

No. 2913. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Substance, paper. Size, 6¼ × 9¼ inches. Pages, 3. Lines, 35 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 9*a*. The other works herein are: Lakṣmītriśatināmāvalīḥ 1*a*, Gōtrapravarakhaṇḍa 10*a*, Pravarakhaṇḍa (Dharmasindhusāra) 12*a*, Pravarakhaṇḍa (Āśvalāyanaśaunaka) 18*a*, Pravaranirṇayaḥ (Smṛtiratna) 21*a*, Āśaucanirṇayaḥ 30*a*, Āpastambaparibhāṣā 29*a* (one page).

Complete.

Same work as the above.

No. 2914. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 8 Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, new.

This is taken from the Āpastambasūtra.

Begins on fol. 54*a*. The other works herein are :—

	Fol.		Fol.
Gōtrapravaranirṇaya ..	1*a*	Gōtrapravaranirṇaya ..	105*a*
do (with commentary)	8*b*	do (with commentary)	113*a*
Sāpiṇḍyadīpikā	42*a*	Gōtrapravarakhaṇḍaḥ ..	141*a*
Pravaramañjarī	48*a*	Tulasīvratakalpa.. .	145*a*
Gōtrapravaranirṇaya ..	57*b*–60*b*	Dattaputraviṣaya	79*a*
Dattamīmāṁsā	64*a*	(Dattakaumudīstha) Kartṛkrama 80*a*.	
		Dattamañjarī	77*a*

Same work as the above.

No. 2915. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Pages, 10. Lines, 33 on a page.

Begins on fol. 12*a* of the MSS. described under No. 2913.

Complete.

This is a portion of Dharmasindhusāra.

Beginning :

धर्मसिन्धुसारस्थप्रवरखण्डः—

सप्त भृगवः; सप्तदशाङ्गिरसाः; चत्वार आत्रेयाः; दश विश्वामित्राः; त्रयः कश्यपाः; चत्वारो वसिष्ठाः; चत्वारो(र) आगस्त्येयाः; मिळित्वा ऊनपञ्चाशद्गोत्राः ।

सप्तभृगौ द्विविधम्—

जामदग्न्यौ द्वौ ।	भृगवः पञ्च ।
कुत्साः १.	आर्ष्टिषेणाः १.
विदाः २.	यास्काः २.
	मित्रयम(व)ः ३.
	वैन्याः ४.
	शुनकाः ५.

End:

धनञ्जयानां प्रवराः—

३. विश्वामित्रः, माधुच्छन्दसः, धानञ्जय्यः ।

जातुकर्णानां प्रवराः—

३. वासिष्ठः, आत्रेयः, जातुकर्ण्यः ।

कपिलानां प्रवराः—

५. आङ्गिरस, बार्हस्पत्य, वध्यासु (भारद्वाज), वान्दन, मातवचसः ॥

Colophon:

इति धर्मसिन्धुसारप्रवरगोत्रदायस्समाप्तः ॥

No. **2916.** गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAH.

Pages, 12 . Lines, 5 on a page.

Begins on fol. 45*a* of the MS. described under No. 430.

Incomplete.

Beginning:

असगोत्रामसपिण्डामसमानप्रवरां वरयेद्वरवध्वोः पितृसन्ताने सप्तमादूर्ध्वं सापिण्ड्यनिवृत्तिर्मातृसन्ताने पञ्चमादूर्ध्वम् । यतस्सन्तानभेदस्तदादि गणयेत् ।

पञ्चमीं सप्तमीं चैव मातृतः (पितृतस्तथा ।

त्रीनतीत्य मातृतः) पञ्चातीत्य पितृत इति वसिष्ठपैठीनसिशिवस्वामिवचनादर्वाङ्निषेधपरः । जामदग्न्या(ग्न्या) वीतहव्या गार्त्समदा वार्ध्रियश्च(ा) वैन्या गौतमा भरद्वाजाः कपयो हरिताः कण्वा विरूपा मौद्गला विष्णुवृद्धा आत्रेया विश्वामित्राः कश्यपा वसिष्ठ(ा) अगस्त्या इत्यष्टादश गणास्स्युः ।

End:

प्रज्ञातबन्धुराचार्यामुष्यायणमनुप्रब्र(ब्रु)वीताचार्यप्रवरं प्रवृणीताधः(थ) ताण्डिना एकारुषे(र्षे)यं सार्ववर्णिकं समामनन्ति मानवेति होता मनुवादित्यध्वर्युर्मानव्यो हि प्रजा इतिः (हि) ब्राह्मणमितिः (हि) ब्राह्मणम् ॥ ४ ॥

No. 2917. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Pages, 3. Lines, 38 on a page.

Begins on fol. 10*a* of the MS. described under No. 2913.

eginning :—Same as that of No. 2916.

End:

प्रजाया भारद्वाजगोत्रान्तर्भावः । तां जननीमिव रक्षेत् । अष्टोत्तरशतं मिन्दाहोमः ; विवाहमात्रे चान्द्रायणं चरेत् । सर्वसंमतमिति विज्ञायते ॥

No. 2918. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Pages, 14. Lines, 23 on a page.

Begins on fol. 18*a* of the MSS. described under No. 2913.

The work contains an alphabetical list of Gōtras and their chief sages and another list of Gōtras and Pravaras.

This is taken from the work of Āśvalāyanaśaunaka.

Beginning:

सर्वे समानगोत्रा(:) स्युरिति गाणगारिः । कथं ह्यात्री(प्री)सूक्तानि भवेयुः ? कथं प्रयाजा इत्यवि(पि) नानागोत्रा(:) स्युरिति शौनक[:]स्तन्त्राणां व्यापित्वात् । [द्वा]द्वृ(गृ)हपतिगोत्रास्व(न्व)यावि(द्वि)शेषास्तस्य रा-(द्विमनुरा)द्विस्सर्वेषां प्रवीरां(वरा)स्त्वावर्तेरन्नावापधर्मत्वाजा(ज्ञा)मदग्नेचा वत्सास्तेषां पञ्चार्षेयो भार्गवच्यावनाप्नवानौर्वजामदग्नेत्यदहा(ग्नेत्यथाह) जामदग्नेचानाम् ।

* * * *

भृग्वङ्गिराः कश्यपोऽत्रिर्वसिष्ठागस्त्यगाधिजाः ।
एते सप्तर्षयस्तेभ्यो गणा ह्यष्टादशाभवन् ॥
भृगोः पञ्च गणाः प्रोक्ता अष्टावाङ्गिरसो गणाः ।
अन्ये त्वेकैकगणिनो गणा ह्यष्टादशाभवन् ॥
पञ्चमः पञ्चमीं कन्यां नोद्वहेदिति यद्वचः ।
तद्वधूवरयोर्भ्रातृस्वसृ(सृ)भावनिबन्धने ॥

* * * *

वैश्वामित्राघमर्षणकौशिक=कौशिकगोत्र ।
विश्वामित्र–औदल–देवरात=सालङ्कायनगोत्रः ॥

अकाराद्यक्षरगोत्र-नामानि.		तस्य ऋषयः.		सङ्ख्या.
अगस्त्य ...	३	अगस्ति, दधीचि, जैमिनि ...		१
अत्रि ...	३	आत्रेय, अत्रि, शातातपः ...		२
अनवृकाक्ष ...	३	गार्ग्य, गौतम, वसिष्ठ		३
अन्यगोत्र ...	३	अन्य, बलि, सारस्वत		४

* * * *

अथ खेटकब्राह्मणानां गोत्रप्रवराः—

सप्तविंशतिसङ्ख्याता ये द्विजा ब्राह्मणा(:)स्मृताः ।
तेषां वेदाश्च शाखाश्च तन्मे निगदतश्शृणु ॥

* * * *

अथ पुराणानुसारेण स्वस्वगोत्रकुलदेवताः कथ्यन्ते :—

गोत्रम्.	देवताः.
शाण्डिल्यसगो	जगदम्बिका.
श्यामायनस	परमेश्वरी.
गौतमस	चामुण्डा.
कौण्डिन्यस.	

End :

ऋग्वेदे आश्वलायनानाम्—

श्यामसगोत्रप्रवराः ३ ५
कपिलसगोत्रप्रवराः ३ २
वश्यसगोत्रप्रवराः ३ ५

यजुर्वेदे माध्यन्दिनानाम्—

लोकायनसगोत्रप्रवराः ५ ०

सामवेदे कौथुमीशाखायाम्—

गार्ग्यसगोत्रप्रवराः ५ ३

अथर्ववेदे पञ्चप्रवराभावः ॥

No 2919. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 141*a* of the MS. described under No. 2914.

Seven Khaṇḍas, complete.

Incomplete.

Same work as the above.

No. 2920. गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 74*a* of the MS. described under No. 211.

Incomplete.

Beginning :

अथ गोत्रप्रवरान् व्याख्यास्यामः—

असगोत्रामसपिण्डामसमानप्रवरां वरयेद्वरवध्वौ(ध्वोः) पितृसन्ताने सप्तमादूर्ध्वं सापिण्ड्यनिवृत्तिर्मातृसन्ताने पञ्चमादूर्ध्वम् । यतस्सन्तानभेदस्तदादि गणयेत् ।

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ।

त्रीनतीत्य मातृतः पञ्चातीत्य पितृत इति वसिष्ठपैठीनसिशिवस्वामिवचनादर्वाङ्निषेधपरः ।

End :

विवाहमात्रे केचिच्चान्द्रायणम् ।
भोगतस्तु परित्यज्य पालयेज्जननीमिव ।
व्रतान्ते निधना सम्यक् नि(मि)न्दाहोमं समाचरेत् ॥

इति क्षत्रियाणां सापिण्ड्य(प्रती)क्षय(या)विवाहमाहुर्विशां सा ए-(पिण्ड्यप्रतीक्षया वि)वाहो विवाहः ॥

No. 2921. गोत्रप्रवरखण्डः—सव्याख्यः.

GŌTRAPRAVARAKHAṆḌAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 104. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

The text was composed by Abhinava Mādhavācārya and the commentary by Nārāyaṇārya, son of Veṅgenāḍu Maṇḍūri Raghunāthārya, pupil of Vaṇśaṭhakōpayati.

Beginning :

श्रिया युतं नरहरिं शठकोपमुनिं गुरुम् ।
प्रणम्य सम्यग्व्याख्यास्ये गोत्रप्रवरनिर्णयम् ॥

श्रीमन्महामहिमाखिलानन्तकल्याणगुणपरिपूर्णाय सकलवेदान्तगम्याय नामरूपात्मकाखिलजगदाधाररूपाय कामितफलदायिने धीमद्विमलमानससरस्सञ्जाततामरसविहरमाणराजहंसाय अखिललोकफलभोगकामरहिताय कैवल्यपदप्रदाय श्रीमते लक्ष्मीनृसिंहाय नमस्करोमि । श्रीमद्वैदिकमार्गप्रवर्तकाः बोधाय[ा]नापस्तम्बादिमहामुनयः स्वस्वकल्पसूत्रेषु वैदिकमार्गरक्षणार्थं सङ्गृहीतगोत्रप्रवरनिर्णयशास्त्राणां तावत् तात्पर्यं कलिकालमाहात्म्यात् निर्णयि-(र्णे)तुमशक्यत्वाद्भृतानुगतिकभ्रान्त्या गोत्रप्रवरशास्त्रविरुद्धभूतसमानगोत्रप्रवरेषु वधूवरविवाहाद्यकृत्यकर्तारो वैदिकबालाः केचित्पण्डितम्मन्या घोरनरकेष्वनेकयुगपर्यन्तं स्थित्वा दुःखिता भवेयुरिति मत्वा शास्त्रपरिज्ञानं न चेद्यदि एते वैदिकबाला(ः) समानगोत्रप्रवरेषु विवाहाद्यकृत्यानि कुर्युस्तन्मा भूदिति गोत्रप्रवरनिर्णयाङ्गभूतश्रौतस्मार्तकर्माचरणपूर्वकतया स्वर्गापवर्गफलानि प्राप्नुवन्त्विति करुणया वैदिकमार्गप्रतिष्ठानिष्ठवसिष्ठगोत्रपवित्रदाभिनवमाधवाचा-

र्यैः अत्यन्तगम्भीरगोत्रप्रवरनिर्णयशास्त्राख्यक्षीरसागरं विचारमन्दराद्रेणा मथित्वा गोत्रप्रवरनिर्णयाख्यामृतमेतदुद्धृतवान् । अस्याभिनवमाधवीयगोत्र-प्रवरनिर्णयामृताख्यशास्त्रस्य प्रथमश्लोकः—

(मू.)

सर्वेश्वरं प्रणम्याथ गोत्रसूत्रकृतो मुनीन् ।
तनुते माधवाचार्यो गोत्रप्रवरनिर्णयम् ॥

(व्या.)

अस्यार्थः—सर्वोपाधिनिर्मुक्तसच्चिदानन्दस्वरूपः ।

* * * *

यस्सर्वजगद्रक्षकस्सर्वेश्वरस्तं सर्वेश्वरं प्रणम्य ।

* * * *

अग्रेवक्ष्यमाणगोत्रप्रवरोपयोगिनः जमदग्न्यादीन् नमः कृत्वा माधवा-चार्यः अभिनवमाधवाचार्याख्यो विपश्चित् । गोत्रप्रवरनिर्णयं तनुते गोत्र-प्रवरनिर्णयं विस्तार्योक्तवान् ।

End :

(मू.)

गोत्रप्रवरविज्ञानं स्वकर्मफललिप्सुभिः ।
सम्पाद्यमाहुर्धर्मज्ञाः प्रत्यवायजिघांसुभिः ॥
सर्वेश्वरस्तवमिदं(मं) गोत्रप्रवरनिर्णयम् ।
विधाय माधवाचार्यस्सर्वेशाय सम(ा)र्पयत् ॥

(व्या.)

गोत्रप्रवररूपमुनिस्वरूपेण वैदिकानां श्रौतस्मार्तादिसमस्तकर्मफलोप-कारेण सक(ल)जगत्संरक्षकसर्वेश्वरस्तोत्ररूपगोत्रप्रवरनिर्णयमुक्त्वा श्रीमाधवा-चार्यस्तस्मै भगवते समर्पयामास ॥

Colophon :

इति श्रीमत्काश्यपान्वयतिलकश्री[म]वणशठारियतीशानचरणारविन्दभृङ्गायमाणवेङ्गिनाटिकुलभूमण्डूरिरघुनाथार्यपुत्रनारायणार्यविरचितव्याख्यासमेतममिनवमाधवाचार्यकृतगोत्रप्रवरनिर्णयशास्त्रं सम्पूर्णतया जातम् ॥

No. 2922. गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol 69*b* of the MS. described under No. 211.

Complete.

This is from Muktāvali and relates to Gōtrapravara. At the end there is also an extract from Muktāvali treating of the prohibition of intermarriage among persons of the same Gōtra.

Beginning :

मुक्तावळिकारप्रोक्तगोत्रप्रवरप्रकारमत्र लिख्यते । यास्कवाधूळमौनमौकानां भिन्नगोत्राणामपि भार्गववैतवाग्य(हव्य)सावेतसेति प्रवरैक्यात्तत्र विवाहवारणाय असमानार्षजामित्युक्तम् । आङ्गिरसाम्बरीषयु(यौ)वनाश्वेति ऋक्षादीनां पञ्च प्रवराः——आङ्गिरसबार्हस्पत्यभारद्वाजवैन्यगार्ग्या इति.

End :

आचार्यगोत्रप्रवरानभिज्ञस्तु द्विजस्स्वयम् ।
दत्वात्मानं तु कस्मैचित्तद्गोत्रप्रवरो भवेत् ॥
यद्वा स्वगोत्रप्रवरविधुरो जमदग्निजः ।
विवाहं च व्रतं तेन गोत्रेणैव समाचरेत् ॥

Colophon :

इति गोत्रप्रवरनिर्णयो मुक्तावळिग्रन्थस्थः ॥

Extract:

परिणीय सगोत्रां तु समानप्रवरां तथा ।
त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेत् ॥

* * * *

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

इति विशेषा(षणा)नि त्रीण्यपि दृढमुपात्तानि । त्यागश्चात्रोपभोगस्यैव, न तु तस्याः ।

यथाह शातातपः—

"उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत् ।"

आपस्तम्बः—

"समानगोत्रप्रवरां कन्यां मूढोऽधिगम्य च ।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते ॥"

इति च मुक्तावळिर्न ग्राह्या । यास्कवाधूळमौनमौकानां भिन्नगोत्राणामपि भार्गववैतहव्यसावेतसेति प्रवरैक्यात्तत्र विवाहो निषिद्धः । आङ्गिरसाम्बरीषयौ . . . . मान्धात्रम्बरीषयुवनाश्वे प्रवरभेदेऽपि युवनाश्वरूपगोत्रैक्यात्तत्र न परस्परम् ॥

इति मुक्तावळिकारग्रन्थः ॥

No. 2923. गोत्रप्रवरनिर्णयः.

GÔTRAPRAVARANIRṆAYAḤ.

Pages, 16. Lines, 6 on a page.

Complete in 10 Prakarṇas.

By Abhinava Mādhavācārya.

Contains two copies of the same work, the first beginning on fol. 1*a* and the second on 105*a* of the MSS. described under No. 2214.

Gives the rules which prohibit intermarriages among members of the same Gōtra or of different Gōtras having the same Pravara.

सर्वेश्वरं प्रणम्याथ गोत्रसूत्रकृतो मुनीन् ।
तनुते माधवाचार्यो गोत्रप्रवरनिर्णयम् ॥
आराधितस्स सर्वेशः श्रौतस्मार्तक्रियाफलैः ।
तुष्टवस्तत्(ष्टस्तत्तत्) फलं दद्याद्वैदिकेभ्यो न चान्यथा ॥ २ ॥
बोधायनापस्तम्बाद्या मुनयो यस्य धारणात् ।
ब्रह्मलोकप्राप्तिमाहुः ज्ञानाद्ब्राह्मण्यरक्षणम् ॥ ३ ॥
प्रथमेऽत्र प्रकरणे परिभाषा निरूप्यते ।
द्वितीये जमदग्नेस्तु गोत्रं शुद्धभृगोस्तथा ॥

End:

इमं मुनिवदच्छिन्नान्वयं पर्वणि पर्वणि ।
जपन्नीशप्रसादेन ब्रह्मलोके महीयते ॥

Colophon :

इति वैदिकमार्गप्रतिष्ठानिष्ठाविशिष्टान्वयाभिनवमाधवाचार्योद्धृतगोत्र-प्रवरनिर्णये दशमं प्रकरणं समाप्तम् ॥

No. 2924. गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2912.

A treatise in Pravara and Gōtra by Abhinava Mādhavācārya.

Same work as the above.

No. 2925. गोत्रप्रवरनिर्णयः.

GOTRAPRAVARANIRṆAYAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 52*a* of the MS. described under No. 2912.

This is taken from the Bōdhāyanasūtra.

Complete.

Beginning:

अथ गोत्रप्रवरनिर्णयः । पञ्चार्षेयभृगूणां वत्सा विदा आर्ष्टिषेणाश्च । त्र्यार्षेयभृगूणां यस्कमित्रयु[वा]वैन्याश्च । शौनका गृत्समदाश्च । गौतमाङ्गिरसायास्यशरद्वन्तः कौमण्डदीर्घतमकारुणु(रेण)पाल(लि)वामदेवो(वौश)नसश्च ॥

End:

यद्वा च्यवनगौतम्ये भरद्वाजात्रिकश्यपाः ।
विश्वामित्रो वसिष्ठश्च यद्गणप्रवरेष्वपि ॥
वर्तन्ते ते सगोत्रास्स्युः कश्यपैश्शाण्डिलास्तथा ।
शुनकास्स्युर्गृत्समदैः भरद्वाजैश्च गर्गकाः ॥ इति ॥

No. 2926. गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 57*b* of the MS. described under No. 2914.

Complete.

Same work as the above.

No 2927. गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 55 of the MS. described under No. 2912.

Complete.

This is a portion of Kṛṣṇācārya smṛtiḥ according to a note in the margin.

Beginning:

ग्रन्थान्तरे गोत्रप्रवरनिर्णयः ।

असमानार्षगोत्रजामित्र(त्य)स्यायमर्थः—समान आर्षे(र्षः)प्रवरो यस्य सः समानार्षः समानार्षजां नोद्वहेदित्यर्थः । अत एव गौतमः—असमानप्रवरैर्विवाह इति । समानता च समाननामतो वेदितव्या ॥

End:

अत्र कपिभिरिति बहुवचनं तु सूत्राभिप्रायम् । तेऽत्राप्युक्ताः ।

तरश्चान्तरितश्चापि विन्दुश्शुक्रः पतञ्जलिः ।

भूयसी शणुकश्चापि जलन्ध इति चक्षते ॥

कपिपुत्रास्समाख्यातास्तेषां कपिवदिष्यते ।

इति कपिवदित्यनेन एषां भारद्वाजकुले विवाहस्सिद्धः ॥

No. 2928. गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 60*b* of the MS. described under No. 2914.

Same work as the above.

No. 2929. गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAḤ

Pages, 6. Lines, 33 on a page.

Begins on fol. 21*a* of the MS. described under No. 2913.

Incomplete.

This is a portion of Smṛtiratnam.

This work is bound in the middle of the MS. volume containing Gōtrapravarakhaṇḍa by Āśvalāyana Śaunaka.

Beginning :

स्मृतिरत्नाख्यधर्मशास्त्रस्थप्रवरस्य निर्णयः । यथा—अथार्षादिनिर्णयः क्रियते ।

तत्र याज्ञवल्क्यः—

"अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
. . . . . असमानार्षगोत्रजाम् ॥" इति ॥

End :

तृतीये चतुर्थे सङ्गच्छावहै मातामही प्रथमा, मातुली द्वितीया, तत्सुता तृतीया, तामुद्वहेदित्यर्थः । उत चतुर्थे सङ्गच्छावह(ा) इति । मातुल्यत्र उत चतुर्थी सा स्वपुत्रेण विवाह्या इत्यर्थः । सिद्धार्थव्युत्पत्त्या सत्यं ज्ञानमनन्तमिति वाक्यवत् प्रामाण्यमस्य वाक्यस्य भवति ॥

No. **2930.** गोत्रप्रवरनिर्णयस्सव्याख्यः.

GŌTRAPRAVARANIRNAYA WITH COMMENTARY.

Pages, 62. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 2912.

Also contains notes in Kanarese.

Complete.

श्रीमन्महामहिमाद्यखिलकल्याणगुणवते सकलवेदान्तवेद्याय नामरूपवते कामिनां कामितफलप्रदाय अतिविमलचित्ताय अखिललोकफलभोगरहितानां कैवल्यप्रदाय अहं शिवाय नमस्कुर्वे । श्रीमद्वैदिकमार्गप्रवर्तकबोधायनापस्तम्बादिमहामुनयः स्वस्वकल्पसूत्रेषु वैदिकमार्गनिर्णयमजानानाः भ्रान्त्या गोत्रप्रवरशास्त्रविरुद्धसमानगोत्रप्रवरवधूवरविवाहाद्य कृत्यमाचरन्तस्सन्तः घोरतरनरके अनेकयुगपर्यन्तं पतिष्यन्तीत्येतद्विज्ञाय तेषां गोत्रप्रवरसाङ्कर्यं मा भूदिति गोत्रप्रवरनिर्णायकश्रौतस्मार्तकर्मानुष्ठानेन स्वर्गापवर्गप्राप्त्यर्थं कृपया वैदिकमार्गप्रतिष्ठानिष्ठवसिष्ठान्वयाभिनवमाध-

वाचार्योऽत्यन्तगम्भीरगोत्रप्रवरशास्त्राम्बुधिं विचारमन्दराद्रिणा मथित्वा गोत्रप्रवरनिर्णयामृतं दधिरे (दुदुहे) । अयमभिनवमाधवीये गोत्रप्रवरनिर्णयस्य प्रथमश्लोकः—

सर्वेश्वरं प्रणम्याथ गोत्रसूत्रकृतो मुनीन् ।
तनुते माधवाचार्यो गोत्रप्रवरनिर्णयम् ॥ १ ॥

अस्यार्थः—सर्वोपाधिरहितस्य.

End :

इमं मुनिवदच्छिन्नान्वयः(यं) पर्वणि पर्वणि ।
जपन्नीशप्रसादेन ब्रह्मलोके महीयते ॥

इत्याह बोधायनः ॥

Colophon :

इति श्रीवैदिकमार्गप्रतिष्ठानिष्ठवसिष्ठान्वयाभिनवमाधवाचार्योद्धृतगोत्रप्रवरनिर्णये दशमप्रकरणं समाप्तम् ॥

No. **2931.** गोत्रप्रवरनिर्णयरसव्याख्यः.

GŌTRAPRAVARANIRNAYA WITH COMMENTARY.

Pages, 66. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No 2914.

Complete.

Same work as the above.

No. **2932.** गोत्रप्रवरनिर्णयस्सव्याख्यः.

GŌTRAPRAVARANIRNAYA WITH COMMENTARY.

Pages, 57. Lines, 6 on a page.

Begins on fol. 113*a* of the MS. described under No 2914.

Complete.

Beginning :

प्रणम्य परमात्मानं स्वतस्सर्वार्थवेदिनम् ।
ति(कु)लानामादिवक्तारं निमित्तं जगतामपि ॥

श्रीमद्वैदिकमार्गप्रवर्तकबोधायनापस्तम्बादिमहामुनिप्रणीतकल्पसूत्रेषु वैदिकमार्गरक्षणार्थं सङ्गृहीताति(प्रौढ) ब्रह्ममीमांसादिविविधि(ध)न्यायोपबृंहितगोत्रप्रवरसूत्रतात्पर्यं कलिकालमाहात्म्यान्निर्णेतुमक्षमाः गतानुगतिकभ्रान्त्या गोत्रप्रवरशास्त्रविरुद्धसमानगोत्रप्रवरवधूवरयोर्विवाहाद्यस्त(स)त्कर्मप्रवर्तका वैदिकबालिशा घोरनरकेषु बहुकालं पतन्तीति शास्त्रदृष्ट्या विचार्य

* * * *

अभिनवमाधवाचार्योऽत्यन्तगम्भीरगोत्रप्रवरशास्त्रसरित्पतिं शास्त्रविचाराभिधमन्दरेण निर्मथ्य गोत्रप्रवरनिर्णयामृतं दुदुहे । तस्यायमाद्यश्लोकः—

सर्वेश्वरं . . . . गोत्रप्रवरनिर्णयम् ॥

सर्वोपाधिविनिर्मुक्तं सर्वजगतामाश्रयं मायातीतं सर्वज्ञं सर्वशक्ति स्वलीलाविशेषविहितजगत्सृष्टिस्थितिसंहारहेतुं निर्विकल्पं परं ब्रह्म प्रणम्य.

End:

यतस्सर्वकर्मसिद्धिः सर्वानर्थपरिहारश्च गोत्रप्रवरनिर्णयादेव भवति । अतो गोत्रप्रवरनिर्णये महान् यत्नः कार्यः ।

गोत्रप्रवरविज्ञानं स्वधर्मफललिप्सुभिः ।
संपाद्यमाहुर्धर्मज्ञाः प्रत्यवायजयेप्सुभिः ॥
सर्वेश्वरस्तु(स्त)वमिदं(मं) गोत्रप्रवरानिर्णयः(म्) ।
विधाय माधवाचार्यस्सर्वेशाय सम(मा)र्पये(य)त् ॥
श्रियं(इमं) मुनिरवि(वद)च्छिन्नान्वयं पर्वणि पर्वणि ।
जपन्नीशप्रसादेन ब्रह्मलोके महीयते ॥

Colophon:

इति वैदिकमार्गप्रतिष्ठानिष्ठानव(वि)शिष्टान्वयाभि(न)वमाधवाचार्योद्धृतगोत्रप्रवरनिर्णये दशमं प्रकरणं समाप्तम् ॥

No. 2933. गोत्रप्रवरमञ्जरी.

GŌTRAPRAVARAMAÑJARĪ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 2912.

A work on the same subject as the above.

Complete.

असगोत्रामसपिण्डामसमानप्रवरां यवीयसीं वरयेदिति पूर्वैरुक्तम् । गोत्रं नाम स्वकुलपरम्परायातं प्रसिद्धम् । काश्यपावत्साद(र)नैध्रुवभारद्वाजकौण्डिन्यादि । समानमेकं गोत्रं यस्याः सा सगोत्रा सा न भवतीत्यसगोत्रा समानस्यच्छन्दसीत्यादिना समानस्य सभावः । प्रवरो नाम ऋषिसम्बन्धः स वार्षेय इत्युच्यते ।

End:

पुरोहितप्रवरेण राज्ञां विवाहः । केचित् क्षत्रियाणां सापिण्ड्यप्रतीक्षया विवाहमाहुर्विशां सापिण्ड्यप्रतीक्षया विवाह इति सर्वसम्मतमिति विज्ञायते ॥

Colophon:

इति प्रवरमञ्जरी समाप्ता ॥

No 2934. गोत्रप्रवरमञ्जरी.

GŌTRAPRAVARAMAÑJARĪ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 2914.

The first portion relating to marriage is wanting.

No. 2935. गोत्रामृतम् (सव्याख्यानम्).

GŌTRĀMṚTAM WITH COMMENTARY.

Pages, 108. Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 2912.

Incomplete.

The text by Nṛsimhapaṇḍita.

Beginning :

श्रीमन्तं प्रवरार्णवं बहुमतं त्वामथ्य बुद्ध्यद्रिणा
नत्वा श्रीनरसिंहमादिपुरुषं बालो नृसिंहोऽप्यहम् ।
विद्वद्भ्यश्च समर्पयामि सकलं गोत्रामृतं तृप्तिदं
पीत्वा तद्विबुधास्सुहृष्टमनसः कुर्वन्तु मे मङ्गलम् ॥

श्रीशाव्याख्या—

यस्तम्भे प्रकटीबभूव तमहं देवं नृसिंहं गुरुं
पूर्णज्ञाननिधिं त्वभीष्टफलदं विघ्नापहं ज्ञानदम् ।
नत्वा गोत्रपतींश्च तत्प्रवरपो गोत्रामृतं तृप्तिदं
व्याख्यास्यामि यथामतीह विबुधाः कुर्वन्तु मे मङ्गलम् ॥

अथ नृसिंहनामकः पण्डितः आश्वलायनादिसूत्रत्रयोदितं प्रवरार्णवादिसर्वग्रन्थांश्च समीक्ष्य गोत्रप्रवरनिर्णयात्मकं गोत्रामृतं कर्तुं विघ्नपरिहारार्थमादौ स्वेष्टदेवतां प्रणमति श्रीमन्तमिति । श्रीमन्तं लक्ष्मीवन्तं बहूनां जनानां मतं सम्मतम् आदिपुरुषं पुराणपुरुषं श्रीनृसिंहं लक्ष्मीनृसिंहंनत्वा.

End :

गोत्रामृतनामकं प्रकरणं तु बहुग्रन्थान् संशोध्य उद्धृतं विद्यमानस्यैवोद्धरणं न त्वविद्यमानस्येति न्यायात्तत्र विद्यमानार्थोद्धारणमेव कृतमिति भावः । ननु

वैयाकरणकिरातैरप(शब्द)[धूताः अनृत]मृगाः क्व यान्ति सन्त्रस्ताः ।
नटविटगायक(गणिका)भिषगाननगह्वराणि यदि न स्युः ॥

इति । आचर्यत्वं भिषक्त्वमेकाधिकरणविरुद्धमिति चेत् प्रमाणानां जागरूकत्वात् तथाहि—

ज्यौतिषं व्यवहारं च प्रायश्चित्तं चिकित्सकम् ।
विना शास्त्रेण यो ब्रूयात् तमाहुर्ब्रह्मघातिनम् ॥
. . . . . विना शास्त्रेणेति मनुवचनात्.

No. 2936. चतुश्चत्वारिंशत्संस्काराः.

CATUŚCATVĀRIMŚATSAMSKĀRĀḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 107*b* of the MS. described under No. 1051.

Complete.

Beginning :

तत्र त्रिविधानि कर्माणि—नित्यनैमित्तिककाम्यभेदेन । नित्यानि पुनर्द्वि-विधानि—पूर्वसंस्कारोत्तरसंस्काररूपेण । गर्भाधानादयः पूर्वसंस्काराः, उत्तरे तु पाकयज्ञसंस्थादयः । अत्र वृद्धाः कथयन्ति—ब्र(ब्रा)ह्मो दैवश्चेति । गर्भाधानादयो ब्राह्मः पूर्वः । पाकयज्ञहविर्यज्ञसोमयागाश्चेति दैव उत्तरः । मिलित्वा चतुश्चत्वारिंशत् । गर्भाधानपुंसवनानवलोभनसीमन्तोन्नयनजात-कर्मनामकरणान्नप्राशनचौलोपनयनमहानाम्नीव्रतमहाव्रतोपनिषद्व्रतगौदानिक - समावर्तनविवाहाः पञ्च महायज्ञा इति विंशतिः पूर्वतनाः । तत्र वेद-व्रतानां नामानि शाखाभेदेनान्यथा कथयन्ति ।

End :

तेन सह उत्तरे द्वाविंशतिसंस्काराः अष्टावात्मगुणाः । ब्रह्मणस्सा-युज्यं गच्छतीत्याह शङ्खः ।

संस्कारैस्संस्कृतः पूर्वैः उत्तरैरपि संस्कृतः ।
नित्यमष्टगुणैर्युक्तः ब्राह्मणो ब्रह्म लौकिकम् ॥

* * * *

अतः सजोषाः यजमानैस्समानप्रीतः त्वं पशूंश्च गवाश्वादीन् सात्म्यं व्रीह्यादिस्थावराणि च रथञ्च पशुव्यतिरिक्तमन्यत्प्राणिजातं पाहि रक्षेत्यर्थः ॥

No. 2937. चातुर्मास्यविधिः.

CĀTURMĀSYAVIDHIḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 12*b* of the MS. described under No. 2749.

Gives directions for the performance of a ceremony called Cāturmāsya which is prescribed for Yatis or ascetics and which is observed for four months, beginning from the full-moon day of the month of Āṣāḍha. During this period the ascetics do not move, as they generally do, from place to place for fear they may tread over and thereby do harm to the small insects which spring up in large numbers during the winter.

Beginning:

अथ चातुर्मास्यविधिरुच्यते—

आषाढादिदिवसे मासांश्चतुरः कार्त्तिकावधि . . . . .
पौर्णमास्यां स्वानुष्ठानानन्तरं मृत्तिकाग्रहणदेशङ्कत्वा . . . . .
ओं भगवदाज्ञया चातुर्मास्यव्रताङ्गमृत्सङ्ग्रहणं करिष्य इति संकल्प्य
. . . . . ततो धर्माणि धारयन् इति मन्त्रेण मृत्तिकां गृहीत्वा . . . पुनः स्नात्वा प्राणानायम्य दर्भेषूपविश्य . . .

ओं माधवश्चतुरो मासान् सर्वभूतहिताय वै ।
स्वापं यास्यति शेषाङ्के लक्ष्म्या सह जगत्पतिः ॥
सुप्तश्च वेत्ति नो यावत् न भवेत् स सनातनः ।
अहं तावत् निवत्स्यामि सर्वभूतहिताय वै ॥

End:

अवशिष्टमृत्तिकां कार्त्तिकपौर्णमास्यां स्वानुष्ठानानन्तरं विधिवत् वपनं कृत्वा स्नात्वाचम्य उर्वीं रोदसी वरिवः कृणोतं . . . . . ते नो मुञ्चतमंहसः इति मन्त्रेण जले क्षिपेत् ॥

Colophon:

इति चातुर्मास्यविधिस्समाप्तः ॥

No. 2938. पत्नीभोजनपात्रनियमः.

PATNĪBHŌJANAPĀTRANIYAMAḤ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 5. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 105*a*. The other works herein are: Satkriyā-kalpamañjarī 1*a*, Prapannapitṛnirūpaṇam 108*a*, Darśanirṇaya 112*a*, Haridinatilakavyākhyā 126*a*, Vṛttaratnapradīpikā 159*a*, Pratyābdikaśrāddhaprayōga 180*a*.

Complete.

Beginning:

श्रीमते धीमते वत्सवंशाम्बुजविवस्वते ।
श्रेयस्सन्धायिने भूयात् श्रुत्यन्तगुरवेऽञ्जलिः ॥

भर्तुः भुक्तिपात्रे भोजनं शास्त्रैर्विप्रतिषिद्धं तथाहि सच्चरित्रसुधानिधौ—

भर्तृशुश्रूषणं कृत्वा ताम्बूलादिप्रदानतः ।
स्वयमद्यात्सनियमं भुक्तेषु श्वश्रुकादिषु ॥

इति भर्तुस्ताम्बूलं दत्वा पश्चात्पत्नी भुञ्जीतेत्युक्तम् ।

End:

कांस्यभोजनन्यायोऽपि उक्तसङ्कोचकपलकांस्यपात्रविषय एवेति न किञ्चिदपि तेदन्यभुक्तिपात्रे पात्रे पत्नीभोजने प्रमाणमुपलभामह इत्याधुनिकतथाविधाचारमुपलभामह इति दिक् ॥

No. 2939. पद्माक्षतुलसीमालिकाप्रतिष्ठा.

PADMĀKṢATULASĪMĀLIKĀPRATIṢṬĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 1. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 48*a*. The other work herein is, Āpastambāparaprayōga 1*a*.

A work on the method of consecrating (1) the Garland of lotus seeds and (2) of Tulasi beads, so as to make them fit to be worn round the neck.

Beginning of (1):

ततः पद्माक्षतुलसीमालिकां धारयेद्बले ।
श्रीमत्प(त्तु प)त्रमतुलं देवदेवेन धारितम् ॥

तयोरुपरि सन्धार्यं सर्वपापप्रणाशनम् ।
पद्मा(क्षमा)लिका धार्या सततं ब्रह्मवादिभिः ॥

प्रतिष्ठितविधानेन तुलसीमालिकापि च ।
पद्माक्षमालिकां गृह्य मूलमन्त्रेण मार्जयेत् ॥

पञ्चगव्यैस्स्थापयित्वा पुण्याहाद्भिस्ततः परम् ।
पवित्रमूलमन्त्राभ्यां द्वादशाक्षरविद्यया ॥

End of (1):

पद्माक्षमालिकामेवं प्रतिष्ठाप्य विधानतः ।
धारयेत्प्रत्यहं विद्वान् अन्यथा(नि)ष्फलं भवेत् ॥

Colophon of (1):

पद्माक्षमालिकाप्रतिष्ठा सम्पूर्णा ॥

Beginning of (2):

तुलसीमालिकामेवं प्रतिष्ठाप्य विधानतः ।
पद्माक्षमालिका(लया)सार्धं धारयेन्मुक्तिभाक् भवेत् ॥

तुलसीमालिकां विद्वान् संगृह्य प्रोक्ष्य वारिभिः ।
पुण्याहैः पञ्चगव्येन स्नाप्य पञ्चामृतैस्ततः ॥

End of (2):

विप्रेण सर्वदा धार्यौ(र्यै) मालिकाद्वयमुत्तमम् ।
कर्मकाले विशेषेण प्रियं देवस्य नित्यशः ॥

Colophon of (2):

इति तुलसीमालिकाप्रतिष्ठा संम्पूर्णा ॥

No. **2940.** पद्माक्षतुलसीमालिकाप्रतिष्ठा.

PADMĀKṢATULASĪMĀLIKĀPRATIṢHṬĀ.

Pages, 4. Lines, 6 on a page

Begins on fol. 7*a* of the MS. described under No. 896.

Complete.

Same work as the above.

No. **2941.** पार्वणस्थालीपाकः.

PĀRVAṆASTHĀLĪPĀKAḤ.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{3}{4}$ inches. Page, 1. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 20*a*. The other works herein are, Gautamasmṛti 1*a*, Aśvalāyanaśrāddhaproyōga 5*a*, Sarasvatīsūktam 18*b*.

Complete.

Beginning:

श्रीरामचन्द्रप्रीत्यर्थं पार्वणस्थालीपाकं करिष्ये । तदङ्गजन्या(मग्न्या) धानं करिष्ये । तत्र देवतापरिग्रहार्थमस्मिन् कर्मण्यस्मिन्नग्नौवाहितेऽग्नावग्निं जातवेदसमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते आज्येनाग्नीषोमा चक्षुषी आज्येनाग्नीमग्नीषोमौ च प्रधानदेवते.

End:

तत्र उलूखलं निधाय उलूखले तण्डुलान् पूरयेत् । व्रीहीन् पत्नी स्वयं वा मुसलेनावहन्य(त्य)तण्डुलान् त्रिः फलीकृतान् त्रिः प्रक्षाल्य श्रपयेत् । शेषं पुनरसन्धानप्रयोगवत् ज्ञातव्यम् ॥

No. 2942· मध्वमताचारविधिः.

MADHVAMATĀCĀRAVIDHIḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 206. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Incomplete.

Treats of the nature of the rites and observances of the Mādhva community.

Beginning:

सन्तर्पयेच्च तिसृभिर्व्याहृतीभिस्तिलाक्षतैः ।
केवलैस्तण्डुलैर्देवानृषीन् सतिलतण्तुलैः ॥
पितॄन् साक्षात्तिलैरेव तर्पयेद्द्विजसत्तमः ।
सतिलैस्तण्डुलैस्तीरे दद्यात्रीनुदकाञ्जलीन् ॥
ये के चेत्यम्बराम्भोभिस्तीरे निष्पीडयेत्तिलैः ।
स्नात्वैवं वाससान्येन शिरोऽङ्गं परिमार्जयेत् ॥

End:

पादस्पृष्टञ्च पतितमकालेनाशुचिस्थितम् ।
भुक्तशिष्टं तथास्पृश्यस्पृष्टं दत्तावशिष्टकम् ॥
वर्ज्यं वल्लित्रयं कन्दं सूरणद्वयमुत्पलम् ।
द्वितयञ्चैव हवियोग्यं चतुर्मुख ॥
जीवन्ती वास्तुकं शाकं कारवल्लीद्वयं तथा ।
तुम्बीदळञ्च भञ्जीञ्च शिम्बमुद्वदलानि च ॥

No. 2943. यतिधर्मः.

YATIDHARMAḤ.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 104. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

This is a work by Puruṣōttamānandasarasvatī, pupil of Pūrṇānanda, regarding the life and duties of an ascetic.

Begins on fol. 1*a*. The other work herein is, Abhinavaṣaḍaśītivyākhyā 52*a*.

The first two leaves are not readable.

Beginning:

तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ।
आ(अ)गारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ॥
समुपोढेषु कायेषु निरपेक्षः परिव्रजेत् ।
श्रुतिः क्षमा दम(मोऽ)स्तेयं शौचमिन्द्रियनिग्रहम्(ः) ॥
ह्रीर्विद्या सत्यमक्रोध(धो)दशकं धर्मलक्षणम् ।
दशलक्षणकं धर्ममनुतिष्ठन्त्समाहितः ॥
वेदान्तान् विधिवच्छ्रुत्वा सन्न्यसेदनृणो द्विजः ।

यद्वा "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतिश्च । तस्मात्क्रमेण वा सन्न्यसेत् । आतुरविधीनाह ।

End:

प्रत्यहं तर्पणं तेषां देवतीर्थेन साक्षतम् ।
कुर्याज्जलं केवलं वा महानद्यां यथाक्रमम् ॥
मात्रादीनां चेतरेषां पितृतीर्थेन तर्पणम् ।
विभाज(ण्ड)को नाम बधे वि(ऋषिरि)त्याह भगवान् यथा ॥

Colophon:

इति श्रीमत्पूर्णानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दसरस्वतीविरचितयतिपार्वणश्राद्धविधिस्समाप्तः ॥

No. 2944. यतिधर्मः.

YATIDHARMAḤ.

Substance, palm-leaf. Size, $6\frac{3}{4} \times 1\frac{3}{4}$ inches. Pages, 113. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

This also deals with the life and duties of Hindu ascetics. Complete.

Beginning:

उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । उप प्र यन्तु मरुतस्सुदानवः । इन्द्र प्राशूर्भवा सचा । प्रैतु ब्रह्मणस्पतिः । प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयन्तु नः ॥

* * * *

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

* * * *

योगावसाने सात्त्विकत्यागं कृत्वा नमः क्षितिधरायेति मन्त्रमुच्चार्य वराहं ध्यायन् वामपादं भूमौ विन्यस्य.

End:

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति मयैव ह्युक्तम् । अतस्तत्त्वतो मद्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्स्व—इति दत्तवरः प्रहर्षपरवशहृदयस्सुखमास्स्व ॥

No. 2945. यतिधर्मः.

YATIDHARMAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 113*b* of the MS. described under No. 2786.

Incomplete.

Same work as the above.

No. 2946. यतिधर्मः.

YATIDHARMAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 50*b* of the MS. described under No. 2786.

Similar to the above in subject-matter.

Incomplete.

Beginning:

दत्तात्रेयसंहितायाम्—

अथ सन्यासिनां धर्मं वक्ष्यामि मुनिसत्तमाः ।
ब्रह्मचारी गृहस्थो वा वनस्थो वा विशेषतः ॥

वैराग्यं प्रतिपन्नश्चेत् मोक्षाश्रममवाप्नुयात् ।
दुर्लभं मानुषं जन्म देहिनां मुनिसत्तमाः ॥

तत्रापि दुर्लभतरं ब्रह्मजन्म कथञ्चन ।
तत्रापि दुर्लभतरं वैराग्यं सर्ववस्तुषु ॥

End:

यतिं विना प्रैषमन्त्रं यः श्रुत्वाऽन्यत्र सन्यसेत् ।
न गृहस्थो न सन्यासी पतत्येव न संशयः ॥

यत्याचारविधौ—

यस्तु सन्न्यासिनं हित्वा गृहस्थात् प्रैषमाश्रयेत् ।
तावुभौ नरकं यातो यावच्चन्द्रदिवाकरम् ॥
इत्यादि । इति यतिकर्तव्यविधौ.

No. 2947. यतिधर्मनिरूपणम्.

YATIDHARMANIRŪPAṆAM.

Pages, 38. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 2631.

Complete.

This consists of Adhyāyas 44 to 56 in Dattātrēyasaṁhitā.

Beginning:

दत्तात्रेयः—

यतयश्च द्विधा प्रोक्ता योगिनः पारमेष्ठिकाः ।
तत्रापि कर्मठाः प्रोक्ताः त्रिविधाः पारमेष्ठिकाः ॥
ज्ञानी कर्मी च वेदी च नामतः परिकीर्तिताः ।
योगिनाममृतं स्थानं पुनरावृत्तिवर्जितम् ॥
अन्येषां ब्रह्मणस्स्थान(नं)मुच्यन्ते ब्रह्मणा सह ।
योगिनामेव संस्कारे चूर्णयागः प्रकीर्तितः ॥

* * * *

इति दत्तात्रेयसंहितायामुत्तरभाग(गे)चूर्णयागो नाम चतुश्चत्वारिंशोऽध्यायः ॥

End:

आत्मजादिपुनर्नव्यकृत्यं सर्वमशेषतः ।
भवतां श्रृण्वतामद्य सर्वं सम्यक् समीरितम् ॥
किमन्यच्छ्रोतुकामा वः(वा) पृच्छेध्वमृषिसत्तमाः ।

Colophon :

इति दत्तात्रेयसंहितायां यत्यादिपुत्रकृत्यनिरूपणं नाम षट्पञ्चाशोऽध्यायः ।

१. चूर्णयाग.	७. यतिपार्वणविधि.
२. संस्कारविधि.	८. पारमेष्ठिकक्रियाविधि.
३. यत्यूर्ध्वक्रियाविधि.	९. स्वर्गीयातिगतिकर्मविधि.
४. देशान्तरमृतयतिपुनस्संस्कारविधि.	१०. यतिवर्ज्यकर्मनिरूपण.
	११. Do.
५. पुनस्संस्कारविधि.	१२. Do.
६. यतिपार्वणविधि.	१३. यत्यादिपुत्रकृत्यनिरूपण.

No. **2948.** यतिधर्मनिरूपणम्.

YATIDHARMANIRŪPAṆAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 37. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Adhyāyas 44 to 52 in Dattātrēyasaṁhitā.

Same work as the above.

No. **2949.** यतिधर्मसमुच्चयः.

YAṬIDHARMASAMUCCAYAḤ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 126. Lines, 6 on a page. Character, Grantha Condition, much injured. Appearance, new.

A brief exposition of the life and duties of a Vaiṣṇava ascetic: by Yādavaprakāśa.

Breaks off in the 11th Parvan.

Beginning:

श्रीमान् जयति लोकानां नायको गरुडध्वजः ।
पाषण्डेभ्यस्त्रयी त्राता येन प्राप्य त्रिलिङ्गताम् ॥
सन्न्यासविषयास्सर्वास्समाहृत्य श्रुतीस्स्मृतीः ।
क्रियते यादवेनायं यतिधर्मसमुच्चयः ॥
विधिः कर्तृदशा लिङ्गं प्रयोगो मुख्यकर्म च ।
अहोरात्रक्रियाचारो लिङ्गधर्मो गतिस्थिती ॥
प्रायश्चित्तानि संस्कारो(र) इत्येकादशपर्वकः ।
यतिधर्मक्रमादत्र धर्मशास्त्रेभ्य उद्धृतम् (:) ॥
तत्र सन्न्यासविधिरस्ति वा न वेति निरूप्यते ।

केचिदाहुः—श्रुतावदृष्टत्वात् यावज्जीवं श्रुतिविरोधे स्मृतीनामप्रामाण्यं नास्त्येव इति । तथा च गौतमः—ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्येति ॥

No. 2950. यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAH.

Substance, palm-leaf (Śrītāla). Size, 18½ × 2½ inches. Pages, 138. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, new.

Wants beginning, the first two pages having been lost.

Complete otherwise.

Beginning—same as in the above.

End:

निदध्यात्प्रणवेनैव ध्यानभिक्षो(:)कलेश्च(ब)रम् ।
प्रोक्षणं खननं चैव सर्वं तेनैव कारयेत् ॥

एतमेव म(ग)वान् वृद्धयाज्ञवल्क्यः ।

Colophon :

इति यादवप्रकाशक(कृते) यतिधर्मसमुच्चये यतिसंस्कारविधिर्नाम एकादशं पर्व ॥

दहनपक्षः—

पुत्रोऽन्यो वा गृहस्थस्स्नात्वाचम्य नवघटे पञ्च रत्नानि प्रक्षिप्य प्रणवेन तीर्थोदकमुपरि नारायणपर(रं)ब्रह्मेत्यादिना अभिमन्त्र्य

* * * *

भूमिर्भूम्नेति मूर्धानं भित्वा गायत्र्या अभिमृश्य लवणेप(ना)च्छाद्य प्रणवेन देवयजनं पूरयेत् स्रगा[ला]दिर्नेध्या(भिराराध)येत् पुनः पुनः ॥

इति यतिधर्मसमुच्चयं(यः) संपूर्णम्(ः) ॥

१. पारिव्रज्यविधि.	६. अहोरात्रक्रिया.
२. पारिव्रज्याधिकारिदशानिरूपण.	७. आचार.
	८. प्रायश्चित्तविधि.
३. लिङ्गनिरूपण.	९. गतिस्थितिनिरूपण.
४. सन्न्यासप्रयोग.	१०. प्रायश्चित्तविधि.
५. मुख्यविधि.	११. यतिसंस्कारविधि.

No. 2951. यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 57. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are, Nārāyaṇabaliprayōga (Bōdhāyana) 30*a*, Yatipārvaṇaśrāddha 27*b*.

Parvas 1 to 9 complete; 10th incomplete.

Seven pages at the end contain certain stanzas from the Śrī-Bhāgavata relating to the conduct and duties of an ascetic.

Same work as the above.

No. 2952. यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 2786.

Incomplete.

Same work as the above.

No. 2953. यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 2786.

11th Parva, complete.

Same work as the above.

No. 2954. यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under No. 2749.

Contains the 11th Parva.

Same work as the above.

No. 2955. यतिपत्नीधर्मनिरूपणम्.

YATIPATNĪDHARMANIRŪPAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2787.

Complete.

Describes the conduct and duties to be adopted by the wife of one who has become a Yati. Forms a portion of Viśveśvara-smṛtisārasaṅgraha by Puruṣōttamānandasarasvatī, a pupil of Pūrnānandapūjyapāda

Beginning :

द्वे रूपे वासुदेवस्य चरं चाचरमेव च ।
चरं सन्न्यासिनां रूपमचरं प्रतिमादिकम् ॥
अथ यतिपत्नीधर्मः—
यतेर्नारायणस्यैव पत्नी लक्ष्मीसमोत्तमा ।
सपुत्रा शयनं भर्तुः पालयन्ती वते(पथि) स्थिता ॥

End :

सपुत्रा शयनं भर्तुरित्यत्र भर्तुश्शयनं स्वशरीरमित्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यातिश्रेष्ठापरोक्षसाक्षात्कारब्रह्मीभूतश्रीमत्पूर्णानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दसरस्वतीविरचितविश्वेश्वरस्मृतिसारसङ्ग्रहे यतिपत्नीधर्मादिनिरूपणं संपूर्णम् ॥

No. 2956. यतिलिङ्गसमर्थनम्.

YATILIṄGASAMARTHANAM.

Pages, 13. Lines, 9 on a page.

Regarding the distinctive features of Yatis.

Begins on fol. 1*a* of the MS. described under No. 2786.

Skandhas 3. Deals with and defines the various characteristics of Hindu ascetics.

Complete.

Beginning :

गुरवे वरदार्याय कुर्वीमहि नमस्क्रियाम् ।
यत्पदाम्भोजसेवा नः सूते वेदान्तसंपदम् ॥

इह खलु कुटीचकबहूदकहंसपरमहंसानां चतुर्णां चरमाश्रमिणामुपवीतत्र(त्रि)दण्डशिखादिलिङ्गं साधारणम् । वृत्तिभेदस्तु तेषां भेदक इति निर्णीयते । तथाहि—शाठ्यायनोपनिषदि श्रूयते—

अथाह ब्रह्म परमं सनातनं ये श्रोत्रिया अकामहता अधीयुः ।

End:

वेदार्थं चान्यथा सर्वं प्रवक्ष्यन्ति कलौ युगे ।
नग्नाः प्रच्छन्नबौद्धाश्च विनिन्दन्ति त्रयीमयम् ॥

भिक्षयिष्यन्ति शूद्रान्नं वयं मुक्ता इतिब्रुवन्(वाः) ।
अन्यानपि स्वधर्मस्थान् चालयिष्यन्ति ते कलौ ॥

एवं वेषं समाश्रित्य जीवन्ति बहवो द्विजाः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥

तस्मात्तान्ना(त्तैर्ना)लपेत् प्राज्ञः न निरीक्षेत वापि तान् ।
आलोकनेन तेषान्तु शुध्यते भानुदर्शनात् ॥

नग्नं वानुपवीतं वा यः श्राद्धे भोजयेद्द्विजम् ।
रेतोमूत्रपुरीषाणि स पितृभ्यः प्रयच्छति ॥

Colophon:

इति यतिलिङ्गसमर्थने तृतीयस्कन्धः ॥

No. 2957. यतिवपनाविधिः.

YATIVAPANAVIDHIH.

Page, 1. Lines, 5 on a page.

Begins on fol. 108*a* of the MS. described under No. 1740.

Incomplete.

Describes the manner in which Vaiṣṇava Yatis should get shaved.

Beginning:

शौनकः—

यतिस्तदा शिखावर्जमृतुसन्धिषु वापयेत् ।
ऊर्ध्वं सितचतुर्दश्या या तिथिस्सा तिथिर्भवेत् ॥
ऋतुसन्धिरिति प्रोक्ता वपनं तत्र कारयेत् ।

End:

मेधातिथिः—

कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् ।
तत्र मुण्डमतिक्रामेत् भिक्षुस्संवत्सरे क्वचित् ॥
वपनानन्तरं स्नात्वा मृद्भिर्द्वादशाभिर्यतिः ।

No. 2958. यतिविषयवचनानि.
YATIVIṢAYAVACANĀNI.

Pages, 15. Lines, 5 on a page.

Begins on fol. 117*a* of the MS. described under No. 2786.

Extracts relating to ascetic life from various Smṛtis.

Incomplete.

Beginning :

यमः—

सर्वसङ्गनिवृत्तस्य ज्ञानयोगरतस्य च ।
नैतस्य दहनं कार्यं नाशौचं नैव च क्रिया ॥
शुचौ देशेऽथ गायत्र्या देहं प्रक्षाल्य वारिणा ।
मधुना सर्पिषा वाज्यैः प्रक्षाल्य च सुगन्धिभिः ॥

End:

आह कपिलः—

सुजीर्णोऽथ कृशो रोगी प्रशान्तो विकलेन्द्रियः ।
शिष्यबन्धुसुतभ्रातृस्वसृभ्यो भैक्षमाचरेत् ॥

तथा सारपद्धतौ—

नैकान्नं भिक्षुरश्नीयात् सदा . . . .

No. **2959.** रजस्वलास्नानविधिः.

RAJASVALĀSNĀNAVIDHIḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 121*a* of the MS. described under No. 587.

This is Bōdhāyanōktam.

Beginning:

ज्वराधि(भि)भूता या नारी रजसावपरिप्लुता ।
कथं तस्या भवेच्छुद्धिः शौचं स्यात् केन कर्मणा ॥
चतुर्थेऽहनि संप्राप्ते स्पृशेदन्यस्तु तां स्त्रियम् ।
स सचेलोऽवगाह्यापः स्पृष्ट्वा स्नायात् पुनःपुनः ॥
दश द्वादश वा कृत्वा ह्याचामेच्च पुनःपुनः ।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥
ब्राह्मणान् भोजयेत् पश्चात् आशीर्वचनपूर्वकम् ।

स्मृत्यन्तरे—

व्याधितानां रजोदोषदूषितानां तथैव च ॥

End:

रजस्वलाया मध्ये मध्ये वस्त्रत्यागः ; स्नातपुरुषस्यान्ते वस्त्रत्यागः । तदनन्तरं पुण्याहोदकेन सुरास्त्वामभिषिञ्चन्त्विति पुराणमन्त्रैरन्ते तां मार्जयेत् ; स्नातपुरुषञ्च मार्जयेत् । अनन्तरं ब्राह्मणान् पूजयेत् । ततः शुद्धा भवतीत्याह भगवान् बोधायनः ॥

No. **2960.** रजस्वलास्नानविधिः.

RAJASVALĀSNĀNAVIDHIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 96*a* of the MS. described under No. 2888.

Complete.

Same work as the above.

No. 2961. रजस्वलास्नानविधिः.

RAJASVALĀSNĀNAVIDHIḤ.

Substance, paper. Size, 12½ × 7½ inches. Pages, 3. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Begins on fol. 47*b*. The other works herein are;—Rudrayāmalam (Paṭalas 32) 1*a*, Umāmahēśvararaśmimālā 40*a*, Kālikākavacaḥ 41*a*, Rajasvalāstōtram 45*a*, Bhairavayāmalam 49*a*, Prayōgaratnāvaliḥ 61*b*, Ucchiṣṭaganapatidhyāna 81*a*, Pratyaṅgirākalpaḥ 84*a*, Pratyaṅgirāvyākhyā 124*a*, Śuddhaśaktimālā 134*a*, Nṛsimhastavarājaḥ 146*a*, Nṛsimhāyutākṣarī 152*a*, Nṛsimhasahasranāmāni 166*a*, Nṛsimhāṣṭōttaraśatam 179*b*.

Same work as the above.

No. 2962. राजाभिषेकविधिः.

RĀJĀBHIṢĒKAVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 2439.

Complete.

Treats of the ceremonies connected with the coronation of kings.

Beginning:

अथातस्सम्प्रवक्ष्यामि नृपतेरभिषेचनम् ।
राजयोगे समुत्पन्नं धर्मज्ञं सत्यवादिनम् ॥

कुलजं बुद्धिसम्पन्नं त्यागशौर्य(गु)णान्वितम् ।
अजि(आजी)नमस्त्रशस्त्रज्ञं विनीतं विजितेन्द्रियम् ॥

देवब्राह्मणभक्तं च वाहनेषु कृतश्रमम् ।
सर्वलक्षणसम्पन्नं मन्त्रिवृद्धैश्च संमितम् ॥

एवं सर्वगुणोपेतं कुमारमभिषेचयेत् ।
शुक्लपक्षे तु पूर्वाह्णे दिवसे दोषवर्जिते ॥

End:

आचार्याय सवत्सां गां कन्यां पूजां समाहितः ।
आचार्यऋत्विक्पूजां च दानानि च विशेषतः ॥
दश(दानानि)कुर्वीत भूरिदानं समाचरेत् ।
एवं यत्(:) कुरुते भक्त्या सुरराजसमो भवेत् ॥

Colophon:

इति गार्ग्योक्तप्रकारेण राजाभिषेकं(कः) सम्पूर्णम्(:) ॥

No. 2963. वचनसारसङ्ग्रहः.

VACANASĀRASAṄGRAHAH.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 150. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Incomplete.

A work on Ācāra by Śrīśailatātadāsa, son of Sundarārya.

Beginning:

श्रीशैलतातदासेन सुन्दरार्यतनूभुवा ।
स ह्यन्तेऽधुना सारवचनानि प्रमाणतः ॥

स्मृतिभ्यश्च पुराणेभ्यस्सङ्गृहीतेभ्य एव च ।
पञ्चकालप्रक्रियायाश्चोपयुक्तानि नित्यशः ॥

तत्रादौ याज्ञवल्क्यः —

ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।

इत्यात्मचिन्तनं विधातव्यम् ।

गर्गः —

नाडिकाषट्कपञ्चाशत्प्रातस्त्वेकाधिकोऽरुणः ।
उषःकालोऽष्टपञ्चाशत् शेषस्सूर्योदयः स्मृतः ॥

End:

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥
ऋतुस्नातां तु यो भार्यां स्वस्थस्सन्नोपगच्छति ।

घोरायामित्यादि । स्वस्थस्समर्थस्सन्यदि नोपेयात् तदा दोषः । अजातपुत्रस्यैवानृ(यमृ)तुगमननियम इति मदनपारिजातक्रमः ॥

No. 2964. वर्ज्याहारविवेकः.

VARJYĀHĀRAVIVĒKAḤ.

Substance, palm-leaf. Size, $11\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 8. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 47*a*. The other works herein are: Śrīguṇaratnakōśaḥ 1*a*, Śrīraṅgarājastavaḥ 13*a*, Paramaikāntibhagavadārādhanakramaḥ 27*a*, Mahānadīstōtra 51*a*, Sāḷagrāmalakṣaṇam 54*a*.

Treats of the kinds of food that ought to be avoided.

Complete.

Beginning:

अद्वारादागतान्नं वरकविरचितं यावमा(ना)ळान्नद्द(म)न्नं
काष्ण्यं वक्त्रच्युतान्नं मुखगतकवळार्धान्नमाकारदुष्टम् ।
दृक्दु(ग्दु)ष्टा(ष्टं)भिस्सटान्नं क्षुतवस(म)नयुतं निन्दितान्नं च स(ा)ङ्घं
नाश्नीयादारनाळं खरशुनकमुखैस्स्पृष्टमालोकितं च ॥ १ ॥

End:

पेयं पर्युषितान्नतोयमथ वा गाङ्गं च (न)मृत्स्नायुतं
पादक्षाळनशेषि(ष)तोयमपि यत्पीतावशेषं परैः ।

तोयं पल्वलकायदा(मा)नपदवीसिद्धं च वर्षोद्भवं
किञ्चास्पृष्टमहीतलं जलमिदं गङ्गासमं सातपम् ॥ १५ ॥

Colophon :

आहारनियमश्लोकं(कः) सम्पूर्णम्(:) ॥

No. 2965. वर्ज्याहारविवेकः.
VARJYĀHĀRAVIVĒKAḤ.

Substance, palm-leaf. Size, 16¾ × 1⅛ inches. Pages, 3. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 29*a*. The other works herein are :—

Aṣṭaślōkīvyākhyā 1*a*, Nyāsaviṁśatiḥ 31*a*, Nyāsaviṁśativyākhyā 33*a*, Dṛṣṭārthaprapattiḥ 43*a*, Upāyānuṣṭhānaprakāraḥ 47*a*, Kṣamāṣōḍaśīstavaḥ 48*a*, Sālagrāmalakṣaṇam 50*a*, Viṣṇusūktam 51*a*, Mahālaksmīmantraḥ 51*b*, Ramāṣṭōttaraśatanāmāvaliḥ 51*b*, Mantrārthōpadēśaḥ 54*a*.

Written by Vēdāntadēśika.

Complete.

Beginning and **End** same as above.

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतौ वर्ज्याहारविवेकस्संपूर्णः ॥

No. 2966. वर्णाश्रमधर्मः.
VARṆĀŚRAMADHARMAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 90*a* of the MS. described under No. 217.

Incomplete.

Deals with the duties appertaining to the four castes, namely, Brāhmaṇa, Ksattriya, Vaiśya and Śūdra, as also to the four stages of life, namely, Brahmacarya, Gārhasthya, Vānaprastha and Sannyāsa.

eginning :

अथातश्शुक्लकीलस॰हिताब्रह्मविद्यायां वर्णाश्रमधर्माः—

ब्रह्मक्षत्रियशूद्रा उत्तमा वैश्या मध्यमा इतरा(रे) अधमा लोके-शस्याङ्गेषूत्पन्नाश्चत्वारो वर्णा(स्त)दितरा(रे) विलोमानुलोमसाङ्कर्याः । कलौ वैश्यादुत्तरोत्तरं सङ्करं भवत्यादिवैश्यस्य निधनात्कुत उच्यत इति.

End :

महिषं कृत्वा प्राग्यथाचरेन्नाचरेत्कुलक्षयम् । प्रपञ्चे त्करम(सङ्करोऽ)स्ति प्रपञ्चे वैश्यवर्णो नास्तीति य एवं वेद ॥

No. 2967. विभूतिधारणविधिः.

VIBHŪTIDHĀRAṆAVIDHIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 854.

On the process of putting on the sacred ashes.

Beginning :

अथातो(त)स्त्रिपुण्ड्रविधिं व्याख्यास्यामो भूत्यै न प्रमदितव्यमिति विज्ञायते । अथाप्युदाहरन्ति—

मध्यमानामिकाङ्गुष्ठैर्यत्पुण्ड्रं भस्मना कृतम् ।
तत्त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम् ॥

End :

स्रष्टा स्पष्टज्छ(श्च)तेनाह त्रिपुण्ड्रस्य प्रशस्तताम् ।
. . . . ललाटे हि तिर्यगूर्द्ध्वञ्च वर्तुलम् ॥
भूत्यै न प्रमदितव्यमित्येतत्तैत्तिरीयोपनिषद्वचः ।
. . . प्र(माणीकृत्य सर्वै)र्धार्यं भस्मेति चाहुः ॥

No. 2968. विवाहपीठादिलक्षणम्.

VIVĀHAPĪṬHĀDILAKṢAṆAM.

Substance, palm-leaf. Size, 15½ × 1⅛ inches. Pages, 31. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 16*a*. The other works herein are: Tithyādinirṇaya 1*a*, Śrāddhōpayuktavacanāni 32*a*.

Incomplete.

Regarding the construction of platforms, &c., on the occassion of marriage ceremonies.

Beginning:

षट्सु प्रादेशमात्रं स्यात् द्विपञ्चाङ्गुलमात्रकम् ।
आर्द्रक्षीरसमायुक्तमित्येते(तत्) पीठलक्षणम् ॥

वेदिकालक्षणम्—

हस्तोन्नतं(ता) हस्तचतुष्टयेन विस्तीर्णतामण्डितवामभागे(गा) ।
सुमण्टपस्तम्भचतुष्टयेन सोपानरम्यं(म्या) तु विवाहवेदि(:) ॥

End:

अपहृत्य परस्यार्थं यः परेभ्यः प्रयच्छति ।
दातारो नरकं यान्ति यस्यार्थस्तस्य तत्फलम् ॥
ज्ञानहीनस्समर्थोऽपि वेदशास्त्रसमन्वितः ।
चण्डालतोयभाण्डानां गङ्गाजलमशुध्यति ॥

No. 2969. विवाहयोग्यस्त्रीनिर्णयः.

VIVĀHAYŌGYASTRĪNIRṆAYAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 25. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 11*a*. The other work herein is, Abhinavaṣaḍaśīti (with Dharmapradīpikā) 1*a*.

Wants beginning.

Regarding the rules for the selection of suitable brides.

Beginning:

चतुर्थीमित्यादिना सङ्ख्यावाचिना पदेन स्त्रीपुरुषात्मकः कश्चित्कूटस्थो लक्ष्यते । तथा च तस्मादारभ्य चतुर्थः पुरुषः पितृबन्धुवर्गे मातृबन्धुवर्गे चोत्पन्नः कूटस्थमारभ्य तत्पुत्रादिगणनायां चतुर्थपुरुषः । चातुर्थीं वधूं कन्यामुद्वहेत् ।

End:

पक्षद्वये पिण्डगोत्रनिवृत्तावप्यवयवसापिण्ड्यनिवृत्तेरभावात् । एवं बन्धुवर्गात्रितये सर्वत्र सापिण्ड्यगोत्रानिवृत्त्यनुवृत्तिभ्यां विवाहनिषेधौ द्रष्टव्यावित्यतिविस्तरेणालम् ॥

No. 2970. विवाहविधिः.

VIVĀHAVIDHIḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 52*a* of the MS. described under No. 211.

Treats of the rules relating to marriage.

Beginning:

मार्कण्डेयः—

कन्यां सरूपिणीं विप्रो भूषणैर्भूषितां सतीम् ।
चोरबुद्ध्या हरेत्क्वापि नरकं याति दारुणम् ॥
तदन्ते भुवमासाद्य भिल्लरूपेन(ण) जायते ।

गालवः—

विप्रो यः कन्यकारत्नं स(र्वाभरण)भूषितम् ।
विप्रजं बाहुजाज्जातं पादजाज्जं विशेषतः ॥

* * * *

देवलः—

ब्राह्मो दैवस्तथा चार्षः प्राजा(पत्य)स्तथासुरः ।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥

लिङ्गपुराणे सूतः—

ब्राह्मे विवाहे राजा(जे)न्द्र बन्धुशीलश्रुतं तथा ।
आरोग्यं सम्यगालोच्य परीक्ष्ये(क्षे)त वरं मुदा ॥

End:

अविधिना कृतमकृतमिति ।

कुलमग्रे परीक्षेत ये मातृतः पितृतश्चेति आश्वलायनोक्तत्वात् ।

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।

* * * *

अन्यैर्दत्ता चेद्विना दातुराज्ञामज्ञानाद्वा बन्धनाद्वा बलाद्वा ।
देयान्यस्मै कन्यका नो निषिद्धा साङ्गोद्वाहे सत्यपि प्राह(गार्ग्यः) ॥

No. 2671. वृषोत्सर्जनम्.

VṚṢŌTSARJANAM.

Pages, 5. Lines, 15 on a page.

Begins on fol. 198*a* of the MS. described under No. 1197.

Regarding the ceremony of setting bulls at large on the occasion of bathing in holy waters.

Complete.

Beginning:

पाषाणदानं प्रथमं च कुर्यात्
आवाहनं तत्र नमस्क्रियाञ्च ।
अर्घ्यं तथा प्रार्थनमभ्यनुज्ञां
स्नानं च कुर्यादथ तर्पणं च ॥

पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरि ।
पाषाणं ते मया दत्तमाहारार्थं प्रकल्पितम् ॥

विश्वाची च घृताची च विश्वयोने ह्यपां पते ।
सान्निध्यं कुरु मे देव सागरे लवणाम्भसि ॥

* * * *

अतिक्रूर महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥
देवालये स्वगृहे पुण्यक्षेत्रे वा वृषोत्सर्जनं कुर्यात् ।

End:

इत्येवं कर्ता पूतं(तो) निर्धूतापमृत्युर्दीर्घायुर्भवतीत्याह भगवान् बोधायनः ॥

No. 2972. वैश्वदेवविधिः.

VAIŚVADĒVAVIDHIḤ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 10. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, new.

Treats of the daily offerings to be made to the Viśvē-Dēvas.

Begins on fol. 1*a*. The other works herein are, Malamāsa viṣaya 1*b*, Tarpaṇaviṣaya 3*a*, Śivaikyadīkṣā 6*a*, Mahimnastavaḥ 9*a*.

Complete.

Beginning:

सदोपवीतिना कार्यं सदा बद्धशिखेन च ।
विशिखो नोपवीतश्च यत् करोति न तत् फलम् ॥

अनाहिताग्नियों दर्शे श्राद्धं कृत्वा विधानतः ।
पितृशेषेण वै कुर्यात् वैश्वदेवं द्विजोत्तमः ॥

प्रत्यब्दे मासिके चैव श्राद्धं कृत्वा विधानतः ।
तच्छेषेणैव कुर्वीत वैश्वदेवं द्विजोत्तमः ॥

End:

वैश्वदेवविहीनस्तु बलिदानविवर्जितः ।
इतस्ततस्तु यो भुङ्क्ते स विप्रो यतिरुच्यते ॥

No. 2973. वैश्वदेवविधिः.

VAIŚVADĒVAVIDHIḤ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 2. Lines, 4 on a page. Character, Telugu. Condition, slightly injured Appearance, old.

Complete.

Begins on fol. 98*a*.

The other works herein are:—

	Fol.		Fol.
Bālagraharōgacikitsā-vidhiḥ	1*a*	Nāgapratiṣṭhā	25*a*
Hōmakuṇḍavidhiḥ ..	7*a*	Aśvatthapratiṣṭhā ..	27*b*
Kākasparśaśāntiḥ ..	,,	Samudrasnāna-māhātmyam ..	82*b*
Pitṛnakṣatrakumāra-jananaśāntiḥ ..	8*b*	Anvārōhaṇavidhiḥ ..	34*a*
Sōmasūryōparāga-nakṣatraśāntiḥ ..	9*b*	Saraṭapatanaśāntiḥ ..	45*a*
Mēkhalājinadaṇḍa-nāśaprāyaścittavidhiḥ	13*a*	Gaulīpatanaphalam ..	47*b*
Śrāddhatarpaṇa-viṣayaḥ	17*a*	Prathamarajasvalā-śāntiḥ	48*b*
Daśāhamadhyasamāpti-nirṇayaḥ	17*b*	Viṣadōṣaśāntiḥ	66*a*
Strīpuṁnakṣatra-lakṣaṇam	18*a*	Sūtakaviṣayaḥ	67*a*
Goulīkṣutaphalam ..	18*b*	Garbhiṇīsaṁskāraḥ ..	75*b*
Nāmanakṣatra-śōdhanam	19*a*	Aparaviṣayavacanāni	29*b* & 76*b*
Viṣṇupratiṣṭhā ..	21*a*	Dēśāntaramṛtasya-kartavyavidhiḥ ..	80*b*
		Aputrakavidhiḥ	82*b*
		Vapanavidhiḥ	83*a*
		Śrādhavamanōcchiṣṭa-saṁsargaprāyaścitta-vidhiḥ	86*a*

	Fol.		Fol.
Ēkōddiṣṭavacanāni ..	93*a*	Āślēṣājananaśāntiḥ ..	115*b*
Agnisaṁsargaprāyaścittam	93*b*	Mūlānakṣatraśāntiḥ ..	117*a*
Nāgapratiṣṭhāvidhiḥ ..	94*b*	Pañcamāriṣṭaśāntiḥ ..	123*a*
Vaiśvadēvavidhiḥ ..	98*a*	Ēkamāsādijananaśāntiḥ	124*a*
Nālaveṣṭanaśāntiḥ ..	99*a*	Trividhāntarālajananaśāntiḥ	125*a*
Prasūtagaṇḍadōṣaśāntikalpaḥ . ..	102*a*	Dagdhayōgādirajasvalāśāntiḥ ..	126*b*
Abhuktanakṣatraśāntiḥ	104*a*	Kuhūśāntiḥ	128*b*
Viṣanāḍījananaśāntiḥ ..	107*b*	Dussvapnaśantiḥ ..	132*a*
Suptanipātaśāntiḥ ..	111*a*	Parjanyaśāntiḥ ..	132*a*
Sarvarōgaśāntiḥ ..	112*a*	Jvaracakram	135*a*
Saṅkramaṇajanmanakṣatraśāntiḥ ..	112*a*	Pīnasarōgaśāntiḥ ..	135*b*
Udakaśāntiḥ	113*b*	Bālagrahacikitsā ..	136*a*
		Gayāṣōḍaśī	138

Beginning :

अथ वैश्वदेवमुच्यते । तत्र विशेषकालानाह—

वृद्धावादौ क्षये चान्ते दर्शे मध्ये महालये ।
आचा(अर्चा)न्तेष्वपि कुर्वीत वैश्वदेवं चतुर्विधम् ॥ इति ॥
श्वानौ हि श्यान(म)शबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां बलिं प्रदास्यामि रक्षेतां पथि सर्वदा ॥
ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋति(ता)स्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ दत्तं मया बलिम् ॥

End :

पञ्चस्थानेषु सूनाश्च पञ्चयज्ञैर्व्यपोहयेत् ॥
द्वावेकं द्वे च चत्वारि प्रत्येकं त्रिभिरेव च ।
पृथिव्यादिदशैकन्तु अत ऊर्ध्वं पृथक् पृथक् ॥

Colophon :

इति वैश्वदेवविधिः ॥

No. 2974. वैष्णवप्रक्रियासङ्ग्रहः.
VAIṢṆAVAPRAKRIYĀSAṄGRAHAḤ.

Substance, palm-leaf. Size, 7⅛ × 1⅝ inches. Pages, 2. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 5*a*. The other work herein is, Sannyāsisāpiṇḍyavidhi 1*a*.

Deals with certain Vaiṣṇava doctrines. Complete.

Beginning:

श्रीमन्नाथमुनिं श्रीमद्यामुनार्यं यतीश्वरम्।
नत्वा सङ्ग्रहतो वक्ष्ये वैष्णवप्रक्रियामहम् ॥
गृह्यादौ धर्मशास्त्रे यदुदितमभवत्तत्प्रपन्नैश्च कार्यं
नित्यं नैमित्तिकं वाप्यगतिकमधिकारानुरूपं ह्यनन्यैः ।
साक्षादित्याख्यजैमिन्यभिधमुनिगिराम्मीन्द्रसामान्यनाम्नां
कृत्वा साक्षात्परत्वं भगवत इति हि प्रक्रिया वैष्णवी स्यात् ॥

End:

सूत्रत्यागो न दोषस्स्मृत इति निगमान्तार्यसद्दिव्यसूक्त्या
वैरुद्ध्यात्स्वाधिकारादनितरशरणैर्वैष्णवैर्वीतरागैः ।
अर्थोऽयं श्रीशपादप्रपदनमहितश्रीभरद्वाजगुप्त-
स्वीयायां संहितायां जयति हि नितरामेष घण्टापथस्स्यात् ॥

Colophon:

श्लोकत्रयेण संक्षिप्ता वैष्णवप्रक्रिया मया ।
श्रीपाञ्चरात्ररक्षादिदेशिकोक्तचनुसारिणी ॥

No 2975. वैष्णवाचारपद्धतिः.
VAIṢṆAVĀCĀRAPADDHATIḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 28. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Treats of certain rites and observances of the Vaiṣṇavas.

Contains the 8th Caraṇa—Strīdharma or the duties of women.

Wants beginning.

Beginning :

. . . . च वर्जयेत्सर्वकर्मसु ।
मधूकं कुटजं ब्राह्मां(ब्राह्मयां) जम्बूप्लक्षावुदुम्बरम् ॥
मातुलुङ्गं पानसञ्च मौचं चर्मदलानि च ॥
आढक्यपर्णी श्रीपर्णी पुन्नागं भाजने शुभम् ॥

End :

बालवृद्धान् भोजयित्वा भर्तारं भोजयेत्ततः ॥
स्वयं हृष्टा ततोऽश्नीयाद्भर्तुर्भुक्तावशेषितम् ।
यथोत्पन्नेन द्रव्येण सन्तुष्टा विगतज्वरा ॥
परमापद्गता चापि भर्तारं न निषेधयेत् ;
भिक्षां च भिक्षवे दद्यात् अलोभपरुषाक्षरा ॥
आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ।
अतिप्रतातथा (मृते म्रियेत या)पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥
एवं या नियताचारा भवेद्भागवती सती ।
तस्याः प्रसीदति हरिः भगवान् रमया सह ॥
श्रीव(त्साङ्कः)सदाचारपद्धत्या कमलापतिः ।
श्रीरामानुजहृत्पद्मशरणो मे प्रसीदतु ॥

Colophon :

इति श्रीवैष्णवाचारपद्धतौ स्त्रीधर्मप्रतिपादकमष्टमं चरणम् ॥

श्रीमन्नि(लि)म्पकीर्त्यश्रीवैष्णवाचारपद्धतौ ।
अष्टमेन नृहर्यक्षप्रणीतचरणेन च ॥
अत्र मे साहसं सोढुमर्हन्ति सुधियो जनाः ।
निरुपाधिकृपावासलक्ष्मणार्याङ्घ्रिसेवकाः ॥

No. 2976. शूद्राचारः.

ŚŪDRĀCĀRAH.

